नावीति नैवकार्यं॥दैवंनास्ति॥नामौकरणंएकएवपिंडअन्नमंत्रणादिसर्वममंत्रकं।अक्ष एम
य्यस्तानेनपतिष्ठतामितिवदेत्॥श्राद्धशेषभोजननंनकार्यं।अंतेस्नानंनवश्राद्धैकोद्दिष्टेतुसर्व २५

ममंत्रकंस्मृत्यर्थसारे महैकोद्दिष्टानंतरंनवश्राद्धमितिक्रमः॥ ॥इतिमहैकोद्दिष्टं॥ ॥
अथद्विजाभावेऽग्नावेकोद्दिष्टविधिः॥ग्रामाद्बहिःशुचौदेशेगोमयेनोपलिप्तेव्याहृतिभिर
निंप्रतिष्ठाप्यापरिसमुह्यपरिस्तीर्यपर्युक्ष्यगंधादिभिरभ्यर्च्यद्विजवदग्निसमीपेदेशेकालौ
स्मृत्वाऽग्नावेकोद्दिष्टश्राद्धंकरिष्यइतिसंकल्पक्षणादिपूर्ववद्दद्यात्॥अग्निसमीपेपूर्ववद
र्घ्यं।अमुकगोत्रायैत्यादिप्रेतायस्वाहेत्यग्नौएकाहुतिंहोमः॥परिवेषणादिसंकल्पांतंपूर्ववत्
ततउदीरतेत्यष्टभिर्मंत्रैःप्रणवाद्यैः स्वाहाकारांतैश्चतुरुत्पृत्याद्यास्तिस्रआहुतीर्जुहोमि
सोपस्करस्यान्नस्यजुहुयात्॥इदंनममेतिवर्जयेत्॥उदीरतेत्यृचस्यांगिरसःपितरस्त्रिष्टुप्
महैकोद्दिष्टान्नद्दोमेवि॥ॐउदीरतामवरउत्परासउन्मध्यमाःपितरःसोम्यासः।असुंयईयुरव
कादृतज्ञास्तेनोवंतुपितरोद्दवेषुस्वाहा॥१॥इदंपितृभ्योनमोअस्त्वद्यपूर्वासोयउपरएसईयुः

येपार्थिवेरजस्यानिषत्तायेवानूनंसुवृजनासुविक्षु॥७॥आहंपितॄंस्सुविदत्राँअवित्सिन
मपांतंचविक्रमणंचविष्णोः॥बर्हिषदोयेस्वधयासुतस्यभजंतपित्वस्तऽइहागमिष्ठाः॥२॥ब
र्हिषदःपितरऊत्यर्वागिमावोहव्याचकृमाजुषध्वं॥तऽआगतावसाशंतमेनाथानूः-मं
योरुपोदधात॥७॥उपहूताःपितरःसोम्यासोबर्हिष्येषुनिधिषुप्रियेषु।तऽआगमंतुतऽइ
हश्रुवंत्वधिब्रुवंतुतेवंतुस्मान्॥५॥आच्याजानुदक्षिणतोनिषद्येमंयज्ञमभिगृणीत
विश्वे।मादहिंसिष्टपितरःकेनचिन्नोयदुऽआगःपुरुषतांकरंम॥६॥आसीनासोअरुणीन
मुपस्थेरयिंधत्तदाश्वषेमर्त्याय।पुत्रेभ्यःपितरस्तस्यवस्वःप्रयच्छतत्तऽइहोर्जंदधात॥७॥येनः
पूर्वेपितरःसोम्यासोनूबर्हिरसोमपीथंवसिष्ठाः।तेभिर्यमःसरराणोहवीष्यन्नुन्नद्भिःप्रति एम
कामंमनु॥८॥एवंद्वात्रिंशदाहुतीर्हुत्वाऽवशिष्टपिंडोनदेयः।अग्निसमीपेएकःपिंडःपूर्ववच ३५

देयःविसर्जनांतंपूर्ववत्।इत्यमावेकोद्दिष्टविधिः॥ ॥अथरुद्रगणश्राद्धं॥तत्रैकादशरुद्रो
द्देशेनरुद्ररूपप्रेतोद्देशेनप्रेतमात्रोद्देशेनवाकार्यरुद्रोद्देशपक्षेसव्यंतद्रूपप्रेतोद्देशपक्षे
पसव्यंतत्रैकादशरुद्रनामानि॥वीरभद्रश्चशंभुश्चगिरीशश्चमहायशाः॥अजैकपादहि
र्बुध्न्यःपिनाकीचापराजितः॥भुवनाधीश्वरश्चैवकपालीचविशांपतिः॥स्थाणुर्भगश्चभग
वानरुद्राएकादशस्मृताः॥यद्वा॥अजैकपादहिर्बुध्न्यःकपालीरुद्रएवच॥वृषाकपिश्चशं
भुश्चकपर्दीरैवतस्तथा॥ हरश्चबहुरूपश्चत्र्यंबकश्चापराजितः॥अथप्रयोगः॥ ॥देश
कालौस्मृत्वाअमुकगोत्रस्येत्यादिप्रेतत्वविमुक्तोत्तमलोकप्राप्त्यर्थंरुद्रगणश्राद्धंकरिष्य
इतिसंकल्प्यक्षणपाद्यासनक्रमेणसर्वंकार्यंत्रैकैनैकैकरुद्रनामग्रहणेनैकैकब्राह्मणभो
जनंकार्यं॥एवंचैकादशब्राह्मणभोजनंभवति॥अत्रैकेनसर्वोद्देशेनएकएवब्राह्मणोभो

जनीयः।भोजनाभावेएकादशआमान्नानिभवंति।एवंवारुद्रूपप्रेतोद्देशपक्षेअजैक
पाद्रूपिणेऽमुकप्रेतायेदमासनमित्यादिप्रत्येकंकार्यं।एकब्राह्मणपक्षेएकादशनामा
न्युक्त्वाएतद्रूपिणेऽमुकगोत्रप्रेतायेत्याद्यूह्यंभोजनानंतरंदक्षिणाविसर्जनादिकार्यं।अ
त्रपिंडदानार्घ्यौंकरणविकिरणाभावः॥ ॥अथवसुश्राद्धं॥ ॥इदंचकृताकृतं॥इद
मपिवसूद्देश पक्षेसव्येनप्रेतरूपप्रेतोद्देशपक्षेत्वपसव्येनकार्यं॥शंकेनाष्टौब्राह्मणाभो
जनीयाः॥अशंकेनैकःसर्वोद्देशेनश्रन्नाभावेआमान्नदानं॥अन्यत्सर्वंपूर्ववत्॥वसुना
मानिच॥ध्रुवोध्वरश्चसोमश्चआपश्चैवानिलोनलः॥प्रत्यूषश्चप्रभासश्चवसवोष्टौप्रकीर्त्ति
ताइति॥अत्रपिंडार्घ्यभावः॥इत्येकादशाद्दकृत्यं॥ ॥अथषोडशश्राद्धानि॥तानिच॥ एम
आद्यमासिक॥१॥नूनमासिक॥२॥द्वितीयमासिक॥३॥त्रैपक्षिक४तृतीयमासिक५चतु ३६

र्थमासिक६पंचममासिक७षष्ठमासिक८नूनषष्ठमासिक९सप्तमासिक१०अष्टममासि म
क११नवममासिक१२॥दशममासिक१३एकादशमासिक१४द्वादशमासिक१५नूनाब्दि
क१६अस्यानितैःकालेकर्त्तव्यानि॥द्वादशैक्यिसपिंडीकरणाधिकारसिध्यर्थंअपक्वप्रेतैकादशो त्त
द्वादशेवाब्दिकार्य्याण्येकोद्दिष्टविधिनायदिमरणादारभ्यद्वादशमासमध्येकश्चिदधि
कमासदानन्मासिकंद्विवारंकार्यं।एवंसप्तदशश्राद्धानिभवंति॥अथप्रयोगः॥तस्मिन्नेवाह
निप्रातःषोडशब्राह्मणान्निमंत्र्यतेषांश्मश्रुकर्माभ्यंगौकारयित्वाकृतमाध्याह्निकःपा
कान्निष्पाद्यशंकौऽदनमात्रमेदंकृत्वाश्राद्धमुपक्रमेत॥अत्यशंकौआमान्नेनकुर्या
त्॥देशकालौस्मृत्वाऽमुकगोत्रस्यामुकप्रेतस्यप्रेतत्वनिवृत्त्योत्तमलोकप्राप्त्यर्थंआद्य
मासिकमित्यादिनूनाब्दिकांतमुक्त्वैतानिषोडशश्राद्धानिस्वस्वकालेकर्त्तव्यानिद्वादश

३७ हसपिंडीकरणाधिकारार्थं अपक्वपक्वैकादशोद्दादशोवाग्निअन्नेनामान्नेवाएकोद्दिष्टविधि न
नातंत्रेणकरिष्यइतिसंकल्प्यअमुकप्रेतस्याद्यमासिकेक्षणःक्रियतां।एवंद्वितीयमासिके
इत्यादिषोडशस्थानेषुक्षणंदत्वाऽमुकगोत्रामुकप्रेताद्यमासिकेद्वितीयमासिकेइदंतेपाद्य
मुपतिष्ठतामित्येवंषोडशाग्रासलणेषुपाद्यंदद्यात्॥अर्घ्येतिलावापेतिलोसिमंत्रेमद्दैकोद्दि
ष्टवद्दद्यः॥एकैकमर्घ्यप्रत्येकंषोडशपात्रेषुघृताक्तंमन्नंप्रत्येकमादायमद्दैकोद्दिष्टवदमु
कशर्मणेप्रेतायस्वाद्देतिएकैकामाहुतिं तदन्नेनकरेहुत्वाहुतमन्नमग्नौप्रक्षिप्यतन्नदाहु
त्यर्थमन्नंयतोगृहीत्वातन्नदन्नंतत्रपरिविष्यांगुष्ठनिवेशनांतंकृत्वामुकप्रेताद्यमासिकश्रा
द्दइदमन्नंयथाशक्तिसोपस्करंसोदकुंभमसृतरूपेतिष्ठतामितिसंकल्पयेत्॥एवंद्वितीयम एम
सिकादौ।शुक्लवत्कृष्णेषुतन्नदन्नंषोडशोपपात्रेषुगृहीत्वातन्नत्कराहुतिंनिष्टमन्नंतत्र ३७

गो अक्षिप्यतन्नद्दिजसमीपेदर्भशिखायाममुकगोत्रामुकप्रेताद्यमासिकादौअयंतेपिंडउपतिष्ठता
मितिषोडशपिंडान्दद्यात्॥आमपक्षेआमान्नस्यसंकल्पःसक्तुपिष्टेनचपिंडदानंपिंडोपरि
तिलोदकंभृंगिराजपत्रादिमद्दैकोद्दिष्टवत्अंजनादिसर्वंप्राकृतंयथाशक्तिदक्षिणांदत्वा
अभिरम्यतामितिविसर्जयेत्॥अन्यत्सर्वंविदितप्रतिपिंडादिमद्दैकोद्दिष्टवत्।एवमेक
देशकालकर्तृकत्वान्नंत्रेणषोडशश्राद्धानिकुर्यात्।आद्यमासिकंसर्वंसमाप्यद्वितीयादि
निप्रत्येकंपृथगेवसर्वाणिननुतंत्रेणेतिकेचित्॥एतदनंतरमाद्याब्दिकमप्येकोद्दिष्टवि
धिनाकार्यं।आद्यमासिकेनतंत्रेणसिद्धेर्नपृथक्कार्यंकिंतुआद्यमासिकमाद्याब्दिकंचतं
त्रेणकरिष्यइतिसंकल्पेतिकेचित्॥ ॥अथसपिंडीकरणश्राद्धं॥ ॥तच्चानेककालत्वे
पिकलौद्वादशाद्दएवकार्यं॥अनित्यत्वाच्छरीरस्य॥तत्रप्रयोगः॥पूर्वेद्युर्वैश्वदेवार्थंद्वौवि

मोप्रेतस्यपित्रादेर्यैःसहसपिंडीकरणंतत्रयार्थेत्रीनेकंचप्रेतार्थमेवंषड्ब्राह्मणान्निमंत्र
येत्॥अत्यन्नौदेवेत्रय्यांप्रेतेचैकैकमितित्रीन्निमंत्रणादिकर्तुस्तेपांब्रह्मचर्यंअपरेद्यु
र्ब्राह्मणानांश्मश्रुकर्माभ्यंगादिकारयित्वाकृतमाध्याह्निकादिर्दैनकालोसंकीर्त्यअमुक
गोत्रस्यामुकशर्मणःप्रेतस्यप्रेतत्वनिवृत्त्यापितृलोकप्राप्त्यर्थंअमुकगोत्रेरमुकशर्मभि
र्वसुरुद्रादित्यस्वरूपेतत्पितृपितामहप्रपितामहैःसहसपिंडीकरणंमृताहाद्बादशाहे
पार्वणोक्तोदृष्टविधानेनकरिष्यइतिसंकल्पयेत्॥मातुःसपिंडीकरणेऽमुकगोत्रायामुक अ
दाय्याअस्मन्मातुरस्मत्पितामही प्रपितामहीवृद्धप्रपितामहीभिरितिविशेषः॥एव एम
मात्रासपिंडनेऽपिज्ञेयंततःकामकालसंज्ञकविश्वेदेवस्थानेक्षणंदत्वाभवद्भिःप्रसादःक ३८
र्तव्यः।प्रेतस्थानेक्षणञ्चपतिष्ठतु॥प्रेतस्यपितृपितामहप्रपितामहस्थानेक्षणंदत्वाभव

सव्येनपार्वणवत्+३

द्भिःप्रसादःकर्तव्यः॥इतिक्षणंदत्वामंडलत्रयंकुर्यात्॥उत्तरेवैश्वदेवमंडलंचतुःकोणंद
क्षिणेप्रेतमंडलंत्रिकोणं॥तद्दक्षिणेपितामहादिमंडलेचतुरस्रे॥कामकालसंज्ञकाविश्वे दे
वाइदंवःपाद्यंइतिविश्वेदेवमंडले॥अमुकगोत्रामुकशर्मन्प्रेतइदंतेपाद्यमितिप्राचीना
वीतीमध्यमंडलेप्रेतायपाद्यंदत्वापार्वणवदमुकगोत्रामुकशर्मन्तत्पितरित्यादिक्रमे
णदक्षिणमंडलेत्रिभ्यःपाद्यंदद्यात्॥कर्तापादौप्रक्षाल्यद्विराचम्योपक्रांतंसपिंडीकरण
श्राद्धंकरिष्यइतिसंकल्प्य॥अत्रैववाप्रागुक्तःसंकल्पःकार्यः॥अपहतासुरक्षांसि
पिशाचायेक्षयंतिपृथिवीमनु॥अन्यत्रेतोगच्छंतुयत्रेतेषांगतंमनः॥उदीरतांदेव
इत्युक्त्वाकामकालसंज्ञकानांविश्वेषांदेवानामिदमासनंप्राङ्मुखंब्राह्मणरूप
यासनंदत्वाऽमुकगोत्रायामुकप्रेतायेदमासनंमितिनवदङ्मुखायासनंदत्वाऽमुकगोत्र

मुपतिष्ठता।

यतत्सपितामहाये

येत्यादितत्पितृप्रेतत्पितामहेत्यादिक्रमेणप्रेतपूर्वभागेउदङ्मुखेभ्यस्त्रिभ्यआसनंदद्यात्
तिलान्विकीर्य्यार्घ्यार्थंएकंपात्रमासाद्यतत्पूर्वतःपात्रत्रयमासाद्यप्रेतपात्रेचतुःकुशांश्चूर्वं
निधायपात्रांतरेत्रि कुशांनिधायअपआसिच्यप्रेतपात्रेमद्दक्षोदृष्टवानिलोसीतिमंत्रो
हेनत्तसीवातिलान्क्षिप्त्वापितृपात्रेषुयथापठितेनतान्क्षिप्त्वागंधपुष्पाणिसर्वत्रक्षिप्त्व
पितृपात्राणिनोदेवीरुषिष्टयुऽआपोभवंतुपीतये॥शंयोरुषिस्रवंतुनः॥इत्यभिमंत्र्य
पितृपात्राणिसंपन्नानीत्यादिपठित्वास्वधार्घ्यइतिनिवेदयेत्॥ततःप्रेतपात्रस्थमेकंपवित्रं
प्रेतस्थानीयब्राह्मणहस्तेदत्वातत्पात्रस्थमुदकंकिंचिदुद्धृत्यामुकगोत्रामुकशर्मन्प्रे
तेदंअर्घ्यमुपतिष्ठतामितिअर्घ्यंदत्वा॥अमुकगोत्रामुकप्रेतपात्रोदकंअमुकगोत्राणा
ममुकशर्मणांप्रेतपितृपितामहप्रपितामहानांअर्घ्यपात्रोदकेनसंयोजयिष्यइतिपृष्टे

संयोजयेतिब्राह्मणेरुच्चरितेप्रेतपात्रस्थंकुशत्रयंपितृपात्रत्रयेदत्वाप्रेतार्घ्यपात्रजलं
वक्ष्यमाणमंत्रैःकिंचित्किंचित्संयोजयेत्मिताक्षरायांस्मृत्यर्थसारेतुप्रेतार्घ्यजलमादा
पितृपात्रेकिंचित्किंचित्संयोज्यअवनिष्टेनपश्चात्त्रेतायार्घ्यंददादित्युक्तं॥मंत्राःतु॥येस
मानाःसमनसःपितरोयमराज्ये॥तेषांलोकस्वधानमोयज्ञेषुकल्पतां॥येसमानासमन
सोजीवाजीवेषुमामुकाः॥तेषांश्रीर्मयिकल्पतामुस्मिंलोकेशतंसमाः॥संगच्छध्वंसंवोम
नांसिजानता॥देवाभागंयथापूर्वेसंजानानाउपासते॥समानोमंत्रःसमानीसमानंमनःस
हचित्तमेषां॥समानंमंत्रमभिमंत्रयेवःसमानेनवोहविषाजुहोमि॥समानीवऽआकूतिःस
मानाहृदयानिवःसमानमस्तुवोमनोयथावःसुसहासति इतिमधुवातेतिऋचंपठेदिति
कश्चित्॥अमुकगोत्रामुकशर्मन्प्रेतामुकगोत्रेरमुकशर्मभिःपितृपितामहप्रपितामहैःस

हसायुज्यंगच्छेत्युक्त्वाअनंतरंपित्रादिपात्रोदकेनपार्वणवत्तेभ्योपिअर्घ्यंदत्वागंधाछा
दनादियथाक्रमंसर्वेभ्योदद्यात्॥प्रेतस्थानेविशेषेणतत:अन्नोकरणंकार्यं॥भोजनार्थादे
नाक्किंचिदन्नंसघृतंगृहीत्वाऽमुकगोत्रायामुकप्रेतायस्वाहेत्येकाहुतिंप्रेतब्राह्मणकरेहु
त्वापात्रांतरेसघृतमन्नमादायपार्वणवत्पित्र्यब्राह्मणहस्तेवाऽन्नोकरणंकृत्वाप्रेतस्था
नाहुत्यन्नंवक्त्रोपक्षिपेत्॥प्रेतस्थानेनवापाणिहोम:पित्र्येहुतमन्नंपरिविष्टान्नेनसंसृज्य ह
तायच्चपाणितलेदत्तंयच्चान्यदुपकल्पितं॥एकीभावेनभोक्तव्यंइष्टथग्भावोनविद्यते।इति
वचनात्॥ततअन्नंपरिविष्य॥दैवेइष्टथिवीतेपात्रमित्यादिकामकालसंज्ञकेभ्योविश्वे
भ्योदेवेभ्यइदमन्नमित्यादिपार्वणवत्॥तत:प्रेतपात्रेइष्टथिवीतेपात्रमित्यादिअत्रामुक रूप
शर्माप्रेतोदेवतेतिविशेष:॥ततोऽमुकगोत्रायामुकशर्मणेप्रेतायेदमन्नमुपतिष्ठतामि ४०

तिप्रेतस्थानेसंकल्प:पित्रादिस्थानत्रयेपार्वणवत्॥भोजनांतेऽवशिष्टपिंडोदेय:॥ततदनंतरं
पिंडदानं॥अवशिष्टसमीपेपात्रेक्ष्योल्लिख्यापहतेत्यभ्युक्ष्यदर्भैरवस्तीर्यामुकगोत्रा मुकप्रे
तायंतेपिंडउपतिष्ठतामित्येकंपिंडंप्रेतोद्देशेनदत्वादक्षिणोपंक्तिरूपेणपार्वणवत्पित्रा त
दिभ्य:पिंडत्रयंदद्यात्॥यद्वाऽग्रेवैप्रेतायतत्पश्चिमेत्रीनपिंडान्पित्रादिभ्यइति॥तत:प्रेत
स्थानेतूष्णीजलंदत्वाऽमुकप्रेतस्ययद्दत्तंश्राद्धंतदक्षय्यमुपतिष्ठतामित्युक्त्वाविशिष्टद
क्षिणांदत्वाभिरम्यतामितिविसर्जयेत्॥सदैववदक्षिणाविसर्जनेभवतीतेति॥ततोमुक
गोत्रस्यामुकप्रेतस्यपिंडंपित्रादिपिंडैःसहसंयोजयिष्यइतिदृष्टेसंयोजयेतिद्विजैःप्रत्युक्ते
मधुवातेतिमंत्रचतुष्केनप्रेतपिंडंत्रेधाविभज्यावयवत्रयंत्रिषुपिंडेषुयोजयेदेभिर्मंत्रैःदृ
ष्टैकै:॥येसमानाः०।येसजाताः०।संगच्छध्वं०।समानोमंत्रः०।समानीवः०।ततोऽमुकगोत्रामु

ROYAL ASIATIC SOCIETY LIBRARY OF THE BOMBAY BRANCH OF THE

कप्रेतामुकगोत्रेणामुकशर्मणस्वपित्रासंसृज्यस्वेतिवदन्प्रेतपिंडप्रथमभागंतत्पितृपिंडे
संयोज्यदधिमधुभ्यांमिश्रीकुर्यात्॥एवंमधुवातेतित्तचमुत्काऽमुकगोत्रामुकशर्मन्प्रेताऽमु
कगोत्रे णामुकशर्मणास्वपितामहेनसंसृज्यस्वेतिवदन्॥प्रेतपिंडद्वितीयभागंप्रेतपितामहे
पिंडेसंयोज्यदधिमधुभ्यांमिश्रीकुर्यात्॥एवमेववदन्॥प्रेतपिंडतृतीयभागंप्रेतप्रपित
महपिंडेसंयोजयेत्॥दधिमधुभ्यांमिश्रीकुर्यात्॥एवंमात्रादिसापिंड्येपितामह्यादिपिंडेसं
योजयेत्॥प्रतिपिंडंसंयोजनेयेसमानाइत्यादीनांसर्वमंत्राणामावृत्तिः॥ततःअत्रपितरोम
दयध्वंइत्यादिसर्वंपार्वणवत्॥केचित्तुप्रेतपिंडावयवत्रयेणयोजितांस्त्रीन्पिंडानिदानीं
ननमृतमारभ्यपुरुषत्रययापार्वणवत् पुनरपिनामगोत्राद्युच्चार्यदद्यादित्याहुः॥द्वादशा एम
हंतंधारितमुन्नीयवस्त्रंपिंडोपरिदद्यात्॥नच्चार्योगृह्णीयात्अवयवपिंडान्नपाकस्थाने ४१

वा

वाचार्योयदेयात्॥ततएषवोन्नगतःप्रेतपितृभागमश्नवान्॥शुभंभवतु शेषा
णांजायतांचिरजीवि नइतिमंत्रंपठेत्॥ततोविकिरंदद्यात्॥त्रिर्वाआपःसंवित्यादि
पार्वणवत्प्रेतस्नानीयविप्रायेतरेभ्योद्विगुणदक्षिणांदत्वावाजेवाजइत्यादिअभिरम्यता
मितिविसर्जयेत्॥ॐस्वस्तीतिवाविसर्जनंआसीमांतमन्नव्रज्यपिंडानांगादौप्रक्षिप्य
स्नात्वागृहमागत्यवैश्वदेवादिकंकृत्वासपिंडीकरणश्राद्धशेषान्नमन्यद्वायथाचारंदृष्ट
सदृशंनीत्वाश्राद्धभो जिनोपिसचैलंस्नानंकुर्युः॥अत्रश्राद्धभोक्तृणांमिथःस्पृष्टोत्तदन्नम
त्यजनभुक्त्वागायत्र्यष्टशतंजपेत्॥उच्छिष्टेसिक्तेतत्प्रक्षाल्यभुक्त्वास्नात्वाद्विशतंजपेत्॥
उच्छिष्टभोजनेसहस्रंजपेत्॥इदंमानुःसपिंडीकरणंसहगमनेभैत्रैवैकेन॥तदादिभिर्वि
भिर्वा॥उभयथाब्राह्मणाःसमंतदभावेपितामह्यादिभिःसह॥पत्न्यामृतमातृकेणमात्रा

कार्यं।

दिभिरमृतमात्रकेणतुपितामह्यादिभिरित्यादिसर्वंनिर्णयावसरेवक्ष्यामः॥ ॥इत्यौर्ध्वदै
हिकपद्धतौसपिंडीकरणप्रयोगः॥ ॥अथद्वादशेत्रयोदशेवाह्निप्रातःस्नात्वाघ्राणानाय
म्यतिथ्यादिकमुच्चार्यामुकगोत्रस्यामुकशर्मणःप्रेतलोकात्पितृलोकगमनेसुसिध्यर्थमस्मत्पितृ
मुकशर्मणांअस्मत्पितृपितामहप्रपितामहानांवसुरुद्रादित्यस्वरूपाणांपाथेयश्राद्धंसदैवंसपिंडंकरि
ष्यइतिसंकल्प्यपाद्यादिसर्वंश्राद्धंपार्वणवत् पक्वान्नेनामान्नेनवाकुर्यात्॥ततःकर्त्तृ
यंगुलानंकुर्यात्॥देशकालौनिर्दिश्यसपरिवारस्यममसकलारिष्टोपशांतयेक्षेमायुः सि
ध्यर्थंचगणेशपूजनपूर्वकंस्वस्तिवाचनंकरिष्यइतिसंकल्प्ययथाशाखंस्वस्त्ययनंवाचयि
त्वाद्विजोगृहीत्वाबंधुभिःसहभुंजीतइत्तनुध्वंखंडधारणतांबूलभक्षणादिकुर्यात्।अ
थोदकुंभश्राद्धं॥तत्रयाज्ञवल्क्यः॥अर्वाक्सपिंडीकरणंयस्यसंवत्सरान्न ... ...वेत्॥

॥ श्रीः॥

संव
त्स
रा
दि
क
पि
तृ

नस्याप्यन्नंक्षीरकुंभंदद्यात्संवत्सरंद्विजइतिगोतमः॥अदेवंपार्वणश्राद्धंक्षीरकुंभमरेभकं॥कुर्यात्संवत्सरा
द्धिकाघ्रौसंकल्पविधिनाचाहं॥अधर्मकंपुनर्भोजनादिनियमरहितं॥तथाच॥इदंक्षयेऽक्षयेवासपिंडने
त्रयोदश्यादिनादरभ्यावद्वर्षप्रतिदिनंकार्यं॥अशक्तौप्रतिमासंनवश्राद्धेसपिंडनेएकोद्दिष्टंक्षये
नुतस्मिन्यथापार्वणमेकोद्दिष्टंवामृताहश्राद्धंकुर्यात्॥तथैवसकुर्यादिति॥तत्रवर्षत्रयादिनेसंवत्स
रविशेषश्राद्धंपार्वणविधिनाशक्त्याभूरिब्राह्मणभोजनंकार्यं॥इतिप्रयोगरत्नेउदकुंभश्राद्धंनाम
त्यं॥अथमातापित्रोर्मरणेप्रथमाब्दिकेविहितनिषिद्धानि॥तत्रधवलनिबंधरत्नेःप्रमीतोपितरोय
स्यैरहस्तस्याशुचिर्भवेत्॥नरैरंनोपित्र्यंयावत्सूतेनवत्सरः॥तथामहागुरुनिपातेनुप्रेतकार्यंयथाविधि
॥कुर्यात्संवत्सरांतेकोद्दिष्टंनपार्वणं॥अन्यदीयमितिशेषः॥स्नानंचैवमहादानंसाध्यायंचाग्नितर्प
णं॥प्रथमेऽहनकुर्यानुमहागुरुनिपातने॥तथा॥सर्वेषांप्रेतकार्याणिमहागुरुनिपातने॥कुर्यात्सं

वसरेर्वा कृश्राद्धमेकंवर्जयेत्॥भृगुः॥मातावैवनमाभ्राताभार्यापुत्रस्तथास्नुषा॥एषांमृ
तोचरेच्छ्राद्धमन्यस्यनपुनःपितुः॥तथा॥मातावैवसुतोभ्राताभार्यावैवविद्यते॥तत्रश्राद्धानिकु प
र्वीत नकुर्याज्जनकेमृते॥एतत्सर्ववर्षपर्यंतमहतेसपिंडनेत्येकेमिनिकेचित्॥अन्यत्र॥
अस्यसेपंगयाश्राद्धंश्राद्धंचापरपक्षिकं॥प्रथमेहेनकुर्वीतसूतेपितुसपिंडने॥अस्यापवादः
अस्मिन्सेपंगयाश्राद्धंश्राद्धंचापरपक्षिकं॥प्रथमेहेपिकुर्वीतयदिस्याद्गृहिमानसु
तइति॥भर्तृमानभर्तृकोवाव्येश्राद्धेदेवनात्वयोग्यतासपाटकेश्राद्धंनहानं॥तत्कृत्वाएतानि
कुर्यादित्यर्थः॥अन्येनुयथाश्रुतंव्याचक्षते॥एतस्यविषयविवेकोऽस्मत्कृतेत्रिस्थली
सेतोगयाप्रकरणेऽवगंतव्यः॥अथपालाशप्रहणविधिः॥तत्रदेशांतरमरणेपरोक्षेयम क
र्तृकेकृच्छ्रानाकृत्वाऽस्थीनिदहेत्॥यद्यस्थीनिचोदकादिभिःस्पृष्टानिस्युस्तदापंचव्यगं ला ४३

दाह

व्यगंधोदकाभ्यांप्रक्षाल्यविधिनादहेत्॥अथयस्यास्थिन्यपिनलभ्यंतेतस्यापूर्णशरीरदाहः॥
सचेवृं॥ विभूमौकृच्छ्रचर्मास्तीर्यतदुपरिकुशरंडस्थिनोनाभिदेशेनन्यसेत्॥शिरस्यष्टौचत्वारिंशत्॥४०॥ग्रीवायांद्वात्रिंशत्॥३२॥बाह्वोःप्रत्येकंपंचाशत्॥१००॥
करांगुलिषुसर्वासुद्वात्रिंशत्॥३२॥उरसिषोडशभिः॥१६॥जठरेत्रिंशत्॥३०॥शिश्नेचत्वारिंशत्॥४०॥अं
डयोस्त्वेकत्रिंशत्॥३१॥उर्वोःप्रत्येकंपंचाशत्॥१००॥जंघानःपादतलंनयावत्यारोःप्रत्येकंपंचद
शा॥३०॥सर्वासुपादांगुलीषुद्वात्रिंशत्॥३२॥एवंषष्ट्यधिकशततत्रयमितेशरीरंनिर्मायोर्णासू
त्रेणशरीरेणसहबध्वाजलाशयेक्षिप्तेनाऽनुक्षिपेत्॥ततःशक्तोनस्यांवक्ष्यमाणा
न्यपिकार्याणि॥मूर्धस्थानेकदलीफलं॥शिरसिनारिकेलंवतुलंतुंबंवा॥ललाटेकदलीपत्रं
रंतेषुशुक्तिर्मीबीजं॥कर्णकरंजं॥नेत्रयोःकपरिके॥नासिकायांनिलपुष्पं॥नाभावाम्रकं॥

स्तनयोर्जंबीरफलद्वयं॥वानेमनःशिलं॥पित्तेहरितालं॥कफेसमुद्रफेनं॥रुधिरमधु॥पु
रीषेगोमयं॥मूत्रेगोमूत्रं॥रेतसिपारदं॥दृषणयोर्वृंताकद्वयं॥शिश्नगुंजरं॥केशेषुनवसूक
रजटाः॥लोमसूक्ष्मोर्णामंसस्थानेयवपिष्टेनमाषपिष्टेनवालिंपेत्॥ततःपंचगव्यमंत्रैःपंचग
व्येनप्रोक्षेत्॥पंचामृतमंत्रैश्चपंचामृतेन॥पुनर्नोअसुमितिहृहदुक्थःप्राणस्त्रिष्टुप्॥प्राणभा
वनेवि०॥पुनर्नोअसुंपृथिवीदृशानुपुनर्द्यौर्दृशीपुनरंतरिक्षं॥पुनर्नःसोमस्तन्वंदृशानुपुनःपू
षापथ्यां३यास्वस्तिरितिप्राणप्रदेहंभावयेत्॥यद्वा॥यत्तेयमंवैवस्वतंमनोजगामदूरकं॥
तत्तआवर्तयामसीहक्षयायजीवसे॥यत्तेदिवंयत्पृथिवींमनो०॥तत्त०॥यत्तेभूमिंचतुर्भृष्टिमनो०॥
तत्त०॥यत्तेचतस्रःप्रदिशोमनो०॥तत्त०॥यत्तेसमुद्रमर्णवंमनोज०॥तत्त०॥यत्तेमरीचीःप्र
वतोमनो०॥तत्त०॥९॥यत्तेओषीयरोषधीर्मनो०॥तत्त०॥यत्तेसूर्ंयदुषंसम०॥तत्त०॥य

त्तेपर्वतान्बृहतोम०॥तत्त०॥यत्तेविश्वमिदंजंमनो०॥तत्त०॥यत्तेपरःपरावतोम०॥तत्त०॥यत्तेभू
तंचभव्यंचम०॥तत्त०॥२॥इतिसूक्तेनप्राणानानीयशुक्रमसीत्योतिरसीतिमंत्रेणपारदंक्षि
प्तेभअक्ष्ण्योर्नइतिषड्भिरंगुलीभिश्चक्षुरादिस्पृशेत्॥अक्ष्ण्योर्नासिकाभ्यांकर्णाभ्यांचुबुकादधि॥
यक्ष्मंशीर्ष्ण्यमस्तिष्काज्जिह्वायाविवृहामिते॥ग्रीवाभ्यस्तउष्णिहाभ्यःकीकसाभ्योऽनूक्या
त्॥यक्ष्मंदोषण्याऽमंसाभ्यांबाहुभ्यांविवृहामिते॥आंत्रेभ्यस्तेगुदाभ्यो वनिष्ठोर्हृदयाद्

धि॥यक्ष्मंमतस्नाभ्योंऽसःप्लीह्नोयकनसोविवृहामिते॥ऊरुभ्यांतेअष्ठीवद्भ्यांपार्ष्णिभ्यांप्रपदाभ्यां॥
यक्ष्मंश्रोणिभ्यांभासदंसेसोविवृहामिते॥मेहनाद्वंकरणाल्लोमभ्यस्तेनखेभ्यः॥यक्ष्मंस
र्वस्मादात्मनस्तमिदंविवृहामिते॥अंगादंगाल्लोम्नोलोम्नोजातंपर्वणिपर्वणि॥यक्ष्मंसर्वस्मादा
त्मनस्तमिदंविवृहामिते॥शरीरंपठित्वानछरीरंस्नापयित्वाचंदनेनानुलिप्यवस्त्रोपवीतेपरिधा

ROYAL ASIATIC SOCIETY LIBRARY BOMBAY BRANCH OF THE

प्यालंकृत्यायंसदेवदनुजनितमभ्रेयरंचास्योपासनमित्यभिध्यात्वावेतरव्याहृतिनपूर्वकंगृह्ण
एवं णीसूत्रेणवेष्टयित्वाकृष्णाजिनेनाद्याद्यपूर्वोक्तविधिनादाहयेत्॥पलाशवृक्षाभावेकुशैःप्रकृतिं
कुर्यात्॥अहिताग्नेःप्रकृतिर्दाहेऽस्थिदाहेतदहरेवाग्नेयमेवदहेत्॥अनाहिताग्नेस्तूक्तन्यायं॥पर्ण
शररहितेपुत्रपत्न्योरग्निहोत्रोक्तयोर्दाहपूर्णमेव॥गृहिताग्नेरुक्तयोर्दाहेपित्र्यश्चपत्नीपुनःसंस्का त
रेपतत्र्यैवमेवाग्नेयंआहिताग्नेरविदग्धेस्थेमृतेयावद्विधिनानसंस्कारस्तावंसुत्रारीनानाग्नेयं न
नचसंध्यादिकर्मलोपः॥अथपुनःसंस्कारेकालशुद्धिः॥अग्नेयमध्येपुनःसंस्कारेयथासंभवंदिने
नोध्यंकालांतरेनुरोध्यमेव॥संवत्सरादूर्ध्वंप्रेतकार्येऽनध्ययणंश्रेयः॥तत्रापिशूण्यपक्षः॥तिथेषु
नंदाव्रयोदश्यौचतुर्दशीरिक्षयंवर्जयेत्॥शुक्रस्यनिवारोधः॥नक्षत्रेषुभरणीकृत्तिकाश्लेषाम
घाधनिष्ठापंचकंत्रिपुष्करणिवातिदुष्टानिसर्वथावर्ज्यानि॥व्यतीपातेपरिघेवैधृतौचयोगेवि ४५

ष्टीकरणेचतुर्थीषष्ठ्यष्टम्यष्टमीस्थेचंद्रेचातिदोषः॥रोहिणीमृगशीर्षपुनर्वसूपूर्वोत्तरचित्रविशाखानुराधापू
टा र्वाषाऽभिजिदुत्तराषाढारिनिद्रिपुष्करणिचदुष्टानिसंभवेवर्ज्यानि॥शिष्टान्यदुष्टानि॥सर्वथादिनशुध्यसं
भवेऽनतिदुष्टंवाद्यनक्षत्रंग्राह्यंनपुनःसंस्कारेऽन्तरंग्राह्यं॥नंदायांशुक्रेचतुर्दश्यांजिज्न्मनक्षत्रेषुए
कोद्दिष्टमनिनिषिद्धं॥एकादशाहादौननिषेधः॥तत्रनित्यादिनैवशोध्यं॥युगादिमन्वादिसंक्रात्यमा
वास्यासूनेतकार्येपुनःसंस्कारेचकिंविदपिनैवशोध्यं॥अथाधिरिणः॥सर्वत्रदाहपिंडाद्यपतिताद्ि-
ज्येष्ठोऽस्यःपुत्रःकुर्यात्॥तदसंनिधौकनिष्ठः॥तयोःसर्वेषामसंनिधौपौत्रोज्येष्ठपुत्रपौत्रादिक्रमे
ण॥तदभावेतथैवप्रपौत्रः॥एषामभावेपुत्रिकापुत्रादयःपुत्राःक्रमेण॥तदभावेतसुत्रादयःपूर्ववत्॥उक्ता
भावेपत्नी॥एवंपुत्राद्यभावेपत्न्याःमत्नी॥तदभावेसपत्नीक॥पत्न्यभावेभ्रातुःपुत्रोभ्रातास्नुषादुहितादा
हित्रः॥अन्यःसगोत्रःसपिंडःब्रह्मचारीमित्रंशिष्योगुरुर्बांधवोधनसंबंधीवादद्यात्॥नपुत्रस्यपितादा

द्याभ्रातुर्जस्यायज्जन्मनः॥यदिस्त्रीहेनकुर्वीतसपिंडीकरणंविना॥१ऽसतिसंततिसंभवे॥अदत्तकन्यायेपित
रेदत्तः॥अन्याभावेदत्तोनामपितरावेवदेहित्रेमातामहौपरस्परं॥मातामहश्वश्रूदौहित्रोजामातुःश्वश्रुरेमि
थः॥श्वश्रूदेस्नुषाभ्रातरेमिथोदत्तःगुरुशिष्योपरस्परं॥सर्वाभावेयःकश्चित्कुर्यात्॥दत्तस्यसर्वसंपत्प्राप्तिः॥व
र्षत्रयानंतरंचूडाभावेपिंडोर्ध्वदेहिकंमंत्रवत्कुर्यात्॥वर्षत्रयादर्वाक्चूडेपिस्त्रीसर्वेमंत्रवत्कुर्यात्॥यद्यपिअदत्त
कोदत्तचूडोवातदग्निदानमेवमंत्रवत्कुर्यात्॥शिष्टमन्येनकारयेत्॥एवंपत्न्याग्निदानमात्रंसमंत्रकं॥कार्यं॥शिष्टमन्ये
नकारयेत्॥तथाचकात्यायनः॥असंस्कृतेचपत्न्याचह्यग्निदानंसमंत्रकं॥कर्तव्यमितरत्सर्वंकारयेदन्यमेवहि॥सुमंतुः
अनुपेतोपिकुर्वीतमंत्रवत्सेतमेधिकं॥यद्यसौदत्तचूडःस्याद्यदिस्याच्चत्रिवत्सरःसपिंडीकरणादर्वाङ्भाविनिश्राद्धनिमि
त्तेऽविभक्तोवासन्निहितःएकएवहिकुर्यात्॥तत्रविभक्तैर्यथाशक्तिस्वकीयद्रव्यंदेयं॥गृह्यपरिशिष्टे॥असगोत्रःसगोत्रो
वायदिस्त्रीयदिवापुमान्॥प्रथमेहनियोद्यात्सदशंसमापयेत्॥तथा॥प्रथमेहनियद्द्रव्यंनदेवस्याद्दशाहि

तथा
मा

कं॥तथा॥उन्नरीयशिलापात्रकर्तृद्रव्यविपर्ययात्॥पूर्वेदत्तांजलीद्द्यात्पिंडदानंतथैवच
आचार्यविपर्ययेपु वंएकादशाहिकंतुदशाह कर्तृज्येष्ठपुत्रएवकुर्यात्॥सपिंडीक
रणंतुयोग्योज्येष्ठपुत्रएवकुर्यात्॥कनिष्ठोपिवा॥नत्वपुत्रादन्यः॥पुत्रेसतिनान्यस्तत्राधि
कारी॥यवीयसाकृतंकर्मज्येष्ठेनतन्नविहायतु॥तज्ज्यायसापिकर्तव्यंसपिंडीकरणंधनः॥
विभक्ताःपुत्राःस्वदेहिकौश्चैतृथक्सपिंडीकरणंकुर्युः॥अविभक्तसुतेष्वार्षिकादिज्येष्ठ
एवकुर्यात्॥विभक्ताःप्रत्येकंपृथक्पृथक्कुर्युः॥ब्रह्मचार्यादीनांदहनोदकदानाद्यधिकारा
भावोवक्ष्यते॥पाखंड्यादीनांमृतानामधिकारिणा पिदहनादिनकार्यं॥तदाहयाज्ञव
ल्क्यः॥पाखंडा नाश्रितास्तेनाभर्तृघ्नकामगादिकाः॥सुरापश्चात्मत्यागिन्योनाग्नौच
दिकभाजनाः॥वेदबाह्यलिंगधारणंपाखंडं॥अनाश्रिताःसत्यप्यधिकारेआश्रमविशेषर

हितास्तेनाब्राह्मण स्वर्णव्यतिरिक्तोत्तमद्रव्यहारिणः। सुरापद्रस्यादिदुष्टद्रव्यगतत्वात्ति
गमविवक्षितं अशौचंतदकंचैतन्मरणेनकार्यमित्यर्थः॥ आत्मत्यागिनोबुद्धिपूर्वकमा
त्मघातिनः॥तेषुविशेषमाह॥गौतमः॥योनाशकशस्त्राग्निविषोदकोबंधनप्रपतनैश्चेछा
यामिति॥प्रायोमहाप्रस्थानं॥अनाशकमनशनं॥प्रपतनंशैलादेःपातइत्यादिनिमित्ते
नाशास्त्रविहितमार्गेणेच्छापूर्वकंमृतानांअशौचादिनेत्यर्थः॥अंगिराः॥चंडालाहुदक
म्सर्पीब्राह्मणाद्वेषकादपि॥दंष्ट्रिभ्यश्चपशुभ्यश्चमरणंपापकर्मणां।उदकंपिंडदानंच
प्रेतेभ्योयत्प्रदीयते॥नोपतिष्ठतितत्सर्वमंतरिक्षेविनश्यति॥आश्वलायनगृह्यपरिशिष्ट
पिचंडालाद्यक्ता।नसंस्कारविधिस्तेषांनैवकार्योदककृिया॥एतदर्थमेवकर्त्तव्यंसूतकंन ९७
चबंधुभिः॥दग्ध्वाशरीरंप्रेतस्यसंस्थाप्यास्थीनियत्नतः।प्रायश्चित्तंतुकर्त्तव्यंत्रैयांडाय ४७

णत्रयं।इथासंकरजातानांप्रव्रज्यासुचतिष्ठतां।आत्मनस्त्यागिनांचैवनिवर्त्तेतोदककृिया॥
इथाजाताःपंचमहायज्ञरहिताःसंकरजाताःप्रतिलोमजाः॥प्रमादात्पूर्वोक्तनिमित्तैर्मरणे
प्रायश्चित्तमुक्तं॥चंडालाभिहतेविप्रेत्वंतरिक्षमृतेपिवा॥कृच्छ्रातिकृच्छ्रचांद्रैस्तुशुद्धिस्तत्र
प्रकीर्त्तिता॥तथाविधेप्रमादमरणेभवत्येवाशौचादि॥तथाहअंगिराः॥अथकश्चित्प्रमा
देनम्रियेतास्युदकादिभिःतस्याशौचंविधातव्यंकर्त्तव्याचोदकक्रियेतिवचनात्।प्रमादे
चांद्रायणंतप्तकृच्छ्रद्वयंकार्यं।यद्वापंचदशकृच्छ्राणिकुर्यात्॥ततोविधिनादाहादिबुधा
चांडालादिमृतास्प्रेतादीनांप्रतिपत्तिःस्मृतावुक्ता॥वैतानंप्रक्षिपेदग्नावसथ्यंचतुष्पथे
पात्राणितुददेद्गोयजमानेहथामृते॥इथाअविदितमार्गेण॥तेषांशरीरंगंगायामन्य
त्रवामहानद्यांक्षिपेत्॥यद्वालौकिकाग्नौअमंत्रकंदग्ध्वास्थीनिस्थापयेत्प्रायश्चित्तंनारा

यणबल्यादौकृतेऽस्थीनि क्षीरेणक्षालयित्वाविधिनादहेत्॥श्राद्धंचकुर्यात्॥प्रायश्चित्त
नारायणबलीचैवत्सरांतेलोकगर्हापरिहारार्थंश्राद्धादौयोग्यत्वार्थंचकार्यौ॥नारायणब
लिःकार्योलोकगर्हाभयान्नरैः॥तथातेषांभवेच्छौचंनान्यथेत्यत्रवीद्यमः इत्युक्तेः॥तेषां
पाखंड्यादीनांबुद्धिपूर्वात्मघातिनांचेत्यर्थः॥अथैषामतिभक्ताःशक्ताःपुत्राद्याःसंतित
दात्मघातकप्रायश्चित्तंद्विगुणं चांद्रद्वयंतप्तकृच्छ्रचतुष्टयंचयद्वात्रिंशत्कृच्छ्राणिकृ
त्वापाखंड्यादीनांयोग्यंसर्वप्रायश्चित्तंचकृत्वानारायणबलिंचकृत्वातदैवकालांतरे
वत्सरादर्वागपिदाहश्राद्धादिकुर्युः॥अनित्यत्वादायुषः॥अकृतनिष्कृतादीनांपाखंड्या
दीनांशवानांस्पर्शेस्नानालंकरणवहनरज्जुछेदनदहनाश्रुपातकथादौज्ञानात्कृत्वा न एम
महासांतपनंचरेत्॥ज्ञानात्तप्तकृच्छ्रं॥एतेष्वेकैकेकारणेत्वज्ञानाद्उपवासःमत्याभ्यसेकृच्छ्रा ४८
क

तिकृच्छ्रचांद्रायणानियोग्यतयाकुर्यात्॥यस्तुवृद्धादिरुचि कित्स्यगुरुव्याधियुतःप्रत्या
ख्यात भिषक्कि योवुद्धिपूर्वकमप्यात्मानंघातयतिपैंगादौवातस्यनदोषः॥शास्त्रानुक्त या
त्मरणत्वात्तस्यप्रायश्चित्तनारायणबलीनस्तः॥त्रिरात्रमेवाशौचं॥चतुर्थदिनेएकाद
शाहकृत्यंपंचमेसपिंडनंत्रूहाशौचेपिपिंडास्त्रयःदशवात्रा द्येअंत्येचाद्विपिंडत्रयंदश
ञ्जलिपक्षेत्रयोऽञ्जलयःस्नानंत्रिपक्षेत्रिरात्रं॥मध्येकिपिंडचतुष्टयंचत्वारश्चौरिशाद्धाञ्ज त्वा
लयंद्वितीयदिनेऽस्थिसंचयनंएवमन्यत्रापित्र्यहाशौचे॥ब्रह्मचारिभिःपूर्वोक्तपाखं
स ड्यादिभिःपतितैःस्त्रीबैःभ्रष्टांतप्रायश्चित्तंत्रयोदशपिंडादिमरणेदहनाशौचोदकदानादि
नकार्यं।ब्रह्मचारीभ्रष्टांतप्रायश्चित्तश्चमातापित्रमहागुरुमातामहमातामह्याचार्योपा
ध्यायानांक्रियादेवतत्रव्रतलोपोनास्ति॥किंतुसूतकान्नंनाश्नीयात्॥नस्तैभिःसहवसे
की

न।मात्रादिव्यतिरिक्तप्रेतकर्मकरणेपुनरुपनयनंब्रह्मचारिणः॥याज्ञवल्क्यः॥एवंमातृ
महाचार्यप्रेतोमुदकक्रिया॥कामोदकंसखिप्रेत स्वस्रीयश्वशुरर्त्विजां॥कामोदकमित्युक्ते
सख्यादावदानेनदोषः॥यमेनांजलिसंख्यायांविशेषउक्तः॥पाषाणंतत्रआदायविप्रदद्या
द्दशांजलीन्।द्वादशक्षत्रियेदद्याद्वैश्येपंचदशास्मृताः॥त्रिंशच्छूद्रायदातव्यास्ततःसंप्रदि
शेद्बुधः॥ ॥अथषोडशश्राद्धानि॥ ॥तानिच॥मासिकानिदशैकंचआद्येद्वेध्यर्द्धमासि
कं।ऊनाब्दमूनषण्मासंप्रेतश्राद्धानिषोडश॥अध्यर्धमासिकंत्रैपक्षिकं॥नवश्राद्धंसपिं
डंचश्राद्धान्यर्पिषोडश ॥एकेनैवचकार्याणिसंविभक्तधनेष्वपि॥तत्रचयथाशक्तिसर्वैर्द
ेयं।यत्रसद्यःशौचंतत्रशंखः॥सद्यःशौचेपिदातव्यं प्रेतस्यैकादशेदनि॥सएवादि
वसप्तस्यश्राद्धपिंडोदकादिषु॥शय्यासनादिष्वितिचपाठः॥एकादशाहाशौचेत्वेकादश

कृत्वंतस्मिन्नेवाहनिहुतीयेचैकादशाहः इतिदुंदिपद्धतौकेचित्तुतत्रापिसद्यःशौचंवदे
कादशादमाहुः॥नवश्राद्धमासिकयोर्विघ्नेकएवः॥नवश्राद्धंमासिकंचयद्यदत्तरितंभवे
त्।तत्तदुत्तरसप्तत्र्यादत्तप्रेतंप्रचक्षते॥अंगिराः॥प्रथमेद्वित्तीयेद्विपंचमेसप्तमेतथा॥
नवमैकादशेचैवनवश्राद्धंप्रकीर्तितं॥शिवस्वामीनवश्राद्धंपंचाहुराश्वलायनशाखिनः
आपस्तंबाःषडित्याहुर्विभाषानैत्रिरीयणः॥पंचएकादशाह्निकव्यतिरेकेणभविष्यत्पुरा
णे वर्णनोपिव्यवस्थां॥नवसप्तविशांशज्ञांनवश्राद्धान्यनुक्रमात॥आद्यंतयोर्वर्णयोस्तु
षडित्याहुर्मदर्षयः।विशांनव॥राज्ञांसप्त॥तथा॥प्रेतश्राद्धेतुयत्पात्रमर्घ्यार्घ्यपरिकल्पि
तं।तत्प्रेतोद्दानमाप्रोक्तंशेषेष्वन्यन्नमामतं।प्रेतश्राद्धेनविकिरइतिरत्नावल्यां॥तथा॥
द्वादशाद्देयदाकुर्यात्सपिंडनं॥एकादशेक्रियाकुर्वीतप्रेतश्राद्धानिषोडश।वस्त्रा

तंकारत्रय्यादिपितुर्यद्वादनादिकं।गंधमाल्यैःसमभ्यर्च्यश्राद्धभोक्तेनदर्पयेत्॥तथा।आ
त्रिषोद्विगुणाद्भोजयान्नीस्वस्तिवाचनं॥पितरंदृष्टःस्वसंबंधःग्रामेणाद्यतथैवच॥पात्रालं
भोवगादश्वउत्सेकोल्लेखनादिकं॥तन्निघ्नश्चविकिरःशेषघ्नस्तथैवच॥प्रदक्षिणाविसर्ग
स्वसीमांत गमनंतथा॥श्राद्धदत्रापदार्थाश्चप्रेतश्राद्धेविवर्जयेत्॥सपिंडीकरणंयावद्दृजुद्
र्नैःपित्रक्रिया।सपिंडीकरणादूर्ध्वंद्विगुणेर्विधिवद्भवेत्॥पतिपुत्रवतीनारीभर्त्तुरग्रेमृ
तायदी॥वृषोत्सर्गंनकुर्वीतगोतुदद्यात्पयस्विनी॥अन्वारोढणेतु॥नवश्राद्धानिसर्वाणि
सपिंडीकरणंपृथक्॥एकएववृषोत्सर्गोगौरेकातत्रदीयते॥यतिघ्नानातपः॥एकोद्दिष्ट
जलंपिंडमाशौचंप्रेतसक्रियां॥नकुर्यात्पार्वणादन्यद्ब्रह्मीभूतायभिक्षवे॥उन्मनाः॥ एम
एकोद्दिष्टंनकुर्वीतयतीनांचैवसर्वदा॥अहन्येकादशेप्राप्तेपार्वणंतुविधीयते॥सपिंडी ५०

करणंतेषांनकर्त्तव्यंसुतादिभिस्त्रिदंडग्रहणादेवप्रेतत्वंनैवजायते॥मातृविषयेशंखः॥
मातुःसपिंडीकरणंकथं कार्यंभवेत्सुतैः॥पितामह्यादिभिःसार्द्धंसपिंडीकरणंस्मृतं।का
र्षिकायां॥पितामह्यादिभिःसार्द्धंमातरंतुसपिंडयेत्॥अन्वारोढणेतुयमः॥पत्याचैकेनक
र्त्तव्यंसपिंडीकरणंस्त्रियाइति॥पत्नीविषयेपैठीनसिः॥अपुत्रायांमृतायांतुपतिःकुर्यात्त
सपिंडनं॥श्वश्वादिभिःसदैवास्याःसपिंडीकरणंभवेत्॥सपिंडीकरणेज्येष्ठपुत्रस्यैवाधि
कारः॥तदुक्तंवायुपुराणे॥श्राद्धानिषोडशादत्वाकुर्यान्नतुसपिंडनं॥प्रोषितावसितेपु
त्रःकालादपिचिरादपि॥यदिषोडशश्राद्धानिकनिष्ठभ्रात्रादिनाकृतानिनदासपिंडत्वमु
वकुर्यादित्यपरार्के॥पितृदत्तांकुर्वन्यदिपुत्रोमृतस्तदातत्पुत्रःपित्रौर्ध्वदैहिकानृ
र्पितामहकृत्यंधनःसंस्कारंकृत्वासर्वमावर्त्तयेत्॥अतीतेतुदशाहेनैवं॥तथा॥शंखोपि

नानुज्ञातेनपौत्रेणपितामहश्राद्धेउपक्रांतेपितृमरणेसतिपित्राशौचंवदन्नेवस्वकालेपिता
महश्राद्धंपौत्रःकुर्यात्।प्रक्रांतेत्वादितिमदनपारिजाते॥गोभिलः॥द्वादशाहादिकालेषु
समाप्तदानसुस्थितं॥सपिंडीकरणंकुर्यात् कालेषूत्तरभाविषु॥शूद्रस्यतुविशुद्धः॥मत्रवर्ज
द्विशूद्राणां द्वादशेऽहनिकीर्तितं॥अमावास्या श्राद्धकारिशूद्रस्यविषयमेतत्॥
अपरार्केकल्पतरौच।चिरबलाच्चाशौचमध्यएवकार्यं॥यत्तुकात्यायनः॥सर्वेषामेववर्णा
नामाशौचांतेसपिंडनंइतिः तदेतद्घातिरिक्तविषयं॥ब्रह्मपुराणे॥आशौचेतिक्रिवर्णीनांद चां
शमंपिंडमुत्सृजेत्॥श्राद्धांतेपिंडदानांतेशुध्यर्थंश्राद्ध माचरेत्॥सपिंडीकरणेव्युक्रमम्
तेतुब्रह्मपुराणे॥मृतेपितरियस्याथविद्यतेचपितामहः॥तेनदेयास्त्रयःपिंडाःपितामह एम
पूर्वकाः॥तेभ्यश्चपैतृकःपिंडोनियोक्तव्यश्चपूर्ववत्॥मातर्यग्रेमृतायांतुविद्यतेचपितामः ५१

यज्ञ

हो।प्रपितामहीपूर्वंतुकार्यंतत्राप्ययंविधिः॥व्युक्रमाच्चप्रमीतानांनैवकार्यासपिंडनांतत्तु
मातापित्रभर्तृव्यतिरिक्तविषयं॥अतएवस्कांदे॥व्युक्रमेणमृतानांनसपिंडीकृतिरिष्यते॥
यदिमातायदिपिताभर्त्रानैवविधिःस्मृतः।एषविधिःसपिंडननिषेधरूपःक्षत्रियादिरपिमद्
कोद्दिष्टमेकादशेहन्येवकुर्यान्नतुसूतकांतेनदाद वसिष्ठः॥एकादशेक्रियछ्राद्धंतत्सामा
न्यमुदाहृतं॥चतुर्णामपिवर्णानांसूतकंतुपृथकपृथक॥लौगाक्षिरपि॥आद्यश्राद्धमशु
द्धोपिकुर्यादेकादशेहनि॥कन्येतात्कालिकीशुद्धिरशुद्धेःपुनरेवसः॥रुद्रगणश्राद्धंतुक्ष
त्रियादिःसूतकांतेकुर्यात्॥एकादशेहनि तथाविप्रानेकादशेवतु॥क्षत्रियादिसूतकांते
भोजयेदयुजोद्विजानिति मत्स्यपुराणात्॥इदंरुद्रगणपरत्वेनव्याख्यातंमदनपारिजाते
गोभिलः॥ब्राह्मणंभोजयेदाद्येद्दोनव्यमनलेथवा॥पुनश्चभोजयेद्विप्रंद्विरावृत्तिर्भवेदिति॥

+सपिंडीकरणंवृत्तं॥मासिकंचोदकुंभंचदेयंतस्यापिवत्सरं॥पैठीनसिः॥सपिंडीकरणादर्वाक्कृ

अपकर्ष

ष्टंचाद्यमासिकाद्यद्विकयोःसिध्यर्थमंगिराः॥यस्यसंवत्सरादर्वाक्कुर्याच्छ्राद्धानिषोडश
एकोद्दिष्टविधानेनकुर्यात्सर्वाणितानितु॥सपिंडीकरणादूर्ध्वंयदाकुर्यात्तदापुनः॥प्रत्यब्द
मेवयथाकुर्यात्तथाकुर्यात्सतान्यपि॥शंखायनेः॥सपिंडीकरणादर्वाक्अपकृष्यकृतान्यपि।
पुनरप्यपकृष्यंतेवृध्युत्तरनिषेधनात्।वृद्धिश्राद्धानंतरंतन्निषेधादित्यर्थः॥अथरात्रौजननं
मरणेरजोदर्शनादौचत्रयःपक्षाः॥अर्द्धरात्रपर्यंतंपूर्वदिनगणनावात्रिभागायारात्रेर्भागद्व
यंपूर्वदिनांतर्गतंवासूर्योदयावधिपूर्वमेवेतिवातदाद्यकृत्यपः॥उदितेतुयदासूर्येनारीणां
दृश्यतेरजः॥जननंवाविपत्तिर्वायस्यादृश्यतस्यनार्वरी॥अर्द्धरात्रावधिःकालःसूतकादौविधी
यते॥रात्रिंकुर्यात्त्रिभागांतुद्वौभागौपूर्वएवतु॥उत्तमोंशःप्रभातेनयुज्यतेमृतसूतके॥रात्रा
वेवसमुत्पन्नेमृतेरजसिसूतके॥एवमेवदिनंग्राह्यंयावन्नाभ्युदितोरविरिति॥अत्रदेशाचा

रात्र
५२

रात्यवस्था॥अथरात्रौदाहादिनिर्णयोदेवज्ञानीये॥रात्रौवारात्रिशेषेवाम्रियंतेचेद्द्विजान
यः॥दाहंकृत्वायथान्यायंह्योपिंडौनिर्वपेत्सुतः॥निगमे॥संध्यायांवातथारात्रौदाहःपाथेयकर्म
च॥नवश्राद्धंचनोकुर्यात्कृतंनिःफलतांव्रजेत्॥रात्रिमृतस्यरात्रावेवदाहः॥वपनंतुप्रातः।
उक्तंचस्मृतिसंग्रहे॥रात्रौदग्ध्वानुपिंडांतंकृत्वावपनवर्जितं॥वपनंनेष्यतेरात्रौश्वस्तदावपन
क्रिया।निगमवचस्तुदिनमृतस्यालस्यादिनारात्रिदाहनिषेधार्थं॥तथा॥नावंरात्र्युषितंचे
त्तीर्त्वाकृच्छ्राद्दहेत्सुतः॥इतिस्मृतिरत्नावल्यां॥दशाहांतर्दशाहेवापतेभविष्यत्पुराणे॥
प्रेतस्नानशौचतंत्रंतुयदि दर्शंप्रपद्यते॥समाप्यचोदकंपिंडानस्नानमात्रंसमाचरेत्॥माता
पित्रविपयेतुशौचमः॥अंतर्दशाहेदर्शश्चेत्तत्रसर्वंसमापयेत्॥पित्रोस्तुयावदाशौचंदद्या
त्पिंडंतिलांजलीन्॥पित्रोरित्येक शेषः॥यत्तुगालवः॥पित्रोरशौचमध्येपियदिदर्शःस

मापतेत्॥तावदेवोत्तरंतंत्रंपर्यवस्येच्चदर्शपरमिति।तदनौरसपुत्रोयदाकरोतितद्विषयंश्रा
द्धादिविषयंवेतिपारिजातेपारस्करमाधवीयेनिर्णयामृतेच॥अथदर्शानंतरंदर्शमातापित्तं
त्रस्यापिसमाप्तिर्नेच्चदमध्येदर्शपातेतेतद्विषयमेवगौतमवचनंअन्येषांतुयदाकदाचित्
दर्शाद्दमध्येदर्शपातेतेतत्रसमाप्तिरिति॥दाहकालेग्निनाशोदग्धकाष्ठैरग्निंमथित्वातेनद
हेत्।भूर्भुवःस्वःस्वाहेत्याहुतिंदुत्वालौकिकेनाग्निनावातद्देहंमहानलेवाक्षिपेत्।दश
हेप्रेतपिंडंदत्वास्नात्वाभुक्तोश्रमपिंडस्यचाहोपवासःसपिंडस्यैकाहः॥मत्याद्दिगुणेदूयो
मतकृत्यंकुर्वतांसंचयनादर्वाकस्त्रीसंगेचांडंत्रुर्ध्वंकायत्रयंअन्येषांप्रेतशौचिनांपूर्वस
चयनात्त्रिरात्रंपश्चादुपवासः॥इत्यादिस्मृत्यंतरेभ्योज्ञेयं॥अन्यदप्युक्तंकारिकायां॥पत्नी
मपिदद्देदेवंभर्तुःपूर्वमृतायदि॥अनग्निकांदद्देदेवंकपालेनद्विभुंजा।अग्निवर्णंकपाल

उक्त्वातत्रविनिक्षिपेत्॥करीषादितोयस्कुजातःसतुकपालजः॥अनुपनीतस्याप्येवं॥
स्मृत्यंतरेतु॥गृहस्थोब्रह्मचारीचविधुरोविधवास्त्रियः॥औपासनश्रोतपन स्मृषाग्निश्चक
पालजः॥देवलः॥चंडालोग्निरमेध्याग्निःसूतकाग्निश्चकर्हिचित्॥पतिताग्निश्चिताग्नि
निक्षिप्तग्रहणोचितः।आहिताग्नेर्देशांतरमरणेविशेषस्तत्रैव॥यस्मिन्देशेस्थितोवह्नि
स्तोन्यत्रमृतोयदि॥चरुःपथिकृतःकार्यःपूर्णाहुतिरथापिवा॥अन्यदीयेनवत्सेनयोगोस्तु
नपयोधरा।आज्यार्थंहन्तेतस्याःपयसाहोमइष्यते॥अन्यस्याअपिहोतव्यंपयसातदस
भवे॥तथा॥कृष्णपक्षेप्रमीयेतयद्यूनःप्रातराहुतीः॥शेषास्तुजुहुयादर्शपर्यंताःपक्षहोम
वत्।तदानीमेवजुहुयात्सायंकालाहुतीरपि॥सायंम्रियेतचेत्सायमाहुतीर्जुहुयादथ॥
तदानीमेवजुहुयात्प्रातःकालाहुतीरपि॥सकृद्गृहीतमंत्रेष्टिभिन्नतंत्रंचहोमयोः॥दर्शेवापि

पक्कुर्वीतस्थालीपाकंतदैवतु॥होमदर्शैर्नकर्त्तव्यौपनर्यदिसजीवति।म्रियेतौपवसथ्येऽग्नि
नैवैनंयाजयेन्नदा।म्रियेताधिश्रितेनित्यहोमङव्येहविःषुच।यथानिःशेषदग्धानितथाता
निदहेन्नदा॥वर्हिष्यासादितेषेवदहविष्षुम्रियतेनदा॥यासांपरिगृहीतानिदेवतानांदर्वी
षितु।चतुर्थ्यंतानिनामानितावतीनांवदेदथ॥स्वाहाकारेणयुगपत्सर्वाणिजुहुयादथ॥
नेष्टंस्विष्टकृदा द्यत्रनश्येषंकार्यमितिस्थितिः॥पिंडप्रमाणंतु॥एकोद्दिष्टेसपिंडेचकपित्थ
तुविधीयते।नारिकेलप्रमाणंतुपत्यहेमासिकेतथा॥तीर्थदर्शेचसंप्राप्तेकुक्कुटांडप्रमा
णतः॥महालयेगयाश्राद्धेकुर्यादामलकोपमं॥प्रथमेहनिपिंडेनमुखंमूर्धाप्रजायते।चक्षुः
श्रोत्रंनासिकेचद्वितीयेहनिजायते।भुजौवक्षस्तथाग्रीवातृतीयेहनिजायते॥नाभिस्थानं एम
गुदंलिंगंचतुर्थेहनिजायते।ऊरूतुपंचमेज्ञेयौषष्ठेमर्मसमुद्भवः॥सप्तमेत्वक्शिरास्नायि ५४

सर्वलोमानिचाष्टमे।नवमेवीर्यसंपत्तिर्दशमेक्षुत्पिपासके।अनुगम्येच्छयाप्रेतंस्नातिमज्जति
सवा।स्नात्वासचैलंस्पृष्ट्वापोघृतंप्राश्यविशुध्यति।घृताभावेतुगायत्र्याद्दशकृत्वःपिबेदपः॥
ज्येष्ठेनवाकनिष्ठेनसपिंडीकरणेकृते॥देशांतरगतानांचपुत्राणांतुकथंभवेत्।श्रुत्वातु
वपनंकार्यंदशाहांतंतिलोदकं॥ततःसपिंडीकरणंकुर्यादेकादशेहनि॥द्वादशाहेनकर्त्त
व्यमितिज्ञातातपोब्रवीत्॥स्मृत्यर्थसारे॥ब्रह्मचारिणामनपत्यानांचसपिंडनंनास्ति।अत
एषांसदैकोद्दिष्टं।व्युत्क्रममृतानांव्यवहितैःसापिंड्यंकार्यंनवा।केचित्सर्वत्रसपिंडनमाहु
रिति॥यतीनांप्रेतत्वंनास्तिअतएषांनैकोद्दिष्टं॥नसपिंडीकरणं॥किंतुएकादशेहनिपार्व
णं॥दंडग्रहणात्पूर्वंमृतेतुदाहादिसपिंडनांतंसर्वंकार्यमेव॥ ॥इतिश्रीमद्धेमेश्वरभट्ट
सूरिसूनुनारायणविरचितायामौर्ध्वदेहिकपद्धतौउपयोगिनोनिर्णयः॥ ॥अथविधान

नि।तत्रब्रह्मचारिमरणेविधानमालायांविशेषः॥येषांकुलेब्रह्मचारीनिधनंप्राप्नुयाद्यदि।
तत्कुलंक्षयमाप्नोतिसोपिदुर्गतिमाप्नुयात्॥यदत्वंप्राप्नुयाद्बोधिद्रुमेऽनवरतंवसेत्।तस्या
पितस्यवंशस्यगतिमिच्छन्महीयसी॥विधानंचविधायाथऔर्ध्वदेहिकमाचरेत्॥मृतस्य
म्रियमाणस्यषडङ्गंव्रतमादिशेत्॥त्रिंशद्योब्रह्मचारिभ्योदद्यात्कोपीनकान्नवान्॥दण्ड
त्राःकर्णमात्रादद्यात्कृष्णाजिनानिच॥पादुकाछत्रमाल्यादिगोपीचंदनमेवच॥मणिप्रव
लमालाश्चब्रह्मसूत्राणिचार्पयेत्॥मंत्रैस्तत्तल्लिंगकैश्चब्रह्मसायुज्यसिद्धये।अभावेब्रह्मचा
रिणांपुण्यात्मानःसाधवःशुभाःएवंकृतेविधानेचविघ्नस्तस्यनजायते॥ब्रह्मचारिमरणे
अर्कविवाहः॥गौनकःब्रह्मचारिमृतौशांतिंकथयामिसमासतः॥तत्रावकीर्णदोषस्यप्र ग्म
यश्चित्तंप्रशांतये॥द्वादशाहंषडहंवाऽन्यहंवाऽशक्तोथवाचरेत्॥ततोव्रतविसर्गाख्यंविधिं ५५

सम्यक्समाचरेत्॥स्नातकोब्रह्मचारीचनिधनंप्राप्नुयाद्यदि।संयोज्यचार्केविधिनासंयो
ज्यौतौततःपरं॥अथाग्निमुपसमाधायएवंगुणेत्याद्यमुकगोत्रस्यामुकनाम्नोमृतस्यब्रह्म
चारिणोव्रतविसर्गंकरिष्यतदंगंहिरण्येननांदीश्राद्धंकरिष्यइतिसंकल्पतत्कृत्वाश्रवा
धानाद्यागंतंकृत्वाजुहुयात्॥व्याहृतयश्चतस्रः॥४॥अग्नयेव्रतपतयेस्वाहा॥५॥अग्न
येव्रतानुष्ठानफलसंपादनायस्वाहा॥६॥विश्वेभ्योदेवेभ्यःस्वाहा॥७॥ततःस्विष्टकृदादि
समाप्यपश्चादर्कसमीपेऽथवाअर्कशाखामानीयअर्कविवाहः॥अर्कब्रह्मचारिणोहरि
द्रयानुलिप्यपीतसूत्रेणावेष्यवस्त्रयुग्मेनाच्छाद्याग्निमुपसमाधायएवंगुणेत्यादिअमुक
गोत्रस्येत्यादिऔर्ध्वदैहिकाधिकारार्थंअर्कविवाहंकरिष्ये॥तदंगंहिरण्येननांदीश्राद्धं
करिष्यइत्यागंतंकृत्वाऽन्यहोमः।अग्नयेस्वाहा॥बृहस्पतयेस्वाहा॥विवाहविधियोजका

यस्वाहा॥ॐयस्मैत्वाकामकामायवयंसंग्राड्जामदे॥तमस्मभ्यंकामंदत्वाऽथेदंत्वंघृतंपिब
स्वाहा॥कामायेदं॰॥चतस्रोव्याहृतयःततःस्विष्टकृदादि॥अर्कशाखाब्रह्मचारिशवंचतु
ष्पथेग्निनाविधिवद्दाहयेत्॥शाखांप्रवाहयेदित्यन्ये॥ ॥इतिब्रह्मचारिमरणविधिः॥ ॥अथ
कुष्ठिमरणेयमः॥मृतस्यकुष्ठिनोदेहंनिखनेन्नोष्टभूमिषु॥वासरत्रितयंपश्चाद्धृत्वान्यत्र
तंदहेत्॥नगंगाम्लवनंदेहनि क्षेपेविधिरुच्यते॥षडङ्गत्रंतपूर्वेणविधिनांत्यक्रतुंचरेत्
॥ततेस्थि चयनंतस्यगंगायांप्रक्षिपेत्सुधीः॥मासिमासितततःकुर्यान्मासिश्राद्धानिषोडश
शान॥संकल्पविधिनाकेचित्प्रवदंतिमनीषिणः॥इत्येतत्कुष्ठिनोत्यूर्ध्वंकथितंशास्त्रकोविदैः॥स्मृतिविज्ञिरनूचानैर्यमाद्यैःपूतविग्रहैः॥ ॥इतिकुष्ठिमरणविधिः॥अथपंचक मरणविधिः॥ ॥गरुडपुराणे॥आदौकृत्वाधनिष्ठार्द्धमेतन्नक्षत्रपंचकंरेवत्यंतंसदादृष्य ५६

मशुभंसर्वदाभवेत्॥दाहस्तत्रनकर्त्तव्योविषादःसर्वजातिषु॥नजलंदीयतेतेषुत्वशुभंसर्व
मभवेत्॥पंचकानंतरंकार्यंकर्तव्यंसर्वमन्यथा॥प्रेतानांगोत्रिणांतस्यसंतापोत्युपजायते॥
गृहेहानिर्भवेत्तृष्टेरक्षेषेषुमृतेलुयः॥तत्रविधिः॥शवस्यतुसमीपेतुक्षेप्तव्याःपुत्तलास्त्र
यः॥दर्भमयास्तुचत्वारःकुशमंत्राभिमंत्रिताः॥ततोदाहःप्रकर्तव्यस्तैश्चपुत्तलकैःसह॥विप्रा
णांदीयतेदानंसर्वविघ्नविनाशनं॥सूतकांतेतदापुत्रैःकार्यंगांतिकपौष्टिकं॥पंचकेषुमृ
तोयोसौनगतिंलभतेनरः॥तिलाश्चैवहिरण्यंचतदुद्देशेघृतंदहेत्॥धनिष्ठादिपंचकस्य
दंडावसुचरुणाजैकपादहिर्बुध्न्यःपूषणः॥वसोःपवित्रं॰॥चरुणास्थोन्नमेनं॰॥शिवोनामा
सि॰॥धृतनोहिर्बुध्न्यः॰॥पूषंतवेतियजुर्वेदिनांमंत्राः॥ज्मयाअत्रेवसवः॰॥तत्वायामि॥
धृतनोहिर्बुध्न्यः॥पूषणाऽअंवेतुनः॥इत्यृग्वेदिनां॥अथपंचकमृतदाहविधिः॥गरुडपुरा

ण।कुंभमीनस्थितेचंद्रेमरणंयस्यजायते।नतस्योर्ध्वगतिर्दृश्यासंततौनशुभंभवेत्।ततस्
दाहःकर्त्तव्योविनाग्न्यस्थिषुजंतुषु॥पचकानंतरंकार्यंकार्यंदाहादिकंखलु॥अथवातदि
नेकार्योदाहस्तुविधिपूर्वकः॥क्रियतेमानुषाणांतुसद्यःसंततिकारणात्॥विप्रस्यनियतः
कार्योदाहस्तुविधिपूर्वकः।धनिष्ठापंचकेजीवोमृतोयदिकथंचन॥त्रिपुष्करेयाम्यभेच
कुलजान्मारयेद्ध्रुवं॥तत्रानिष्टविनाग्न्यर्थंविधानंसमुदीर्यते॥दाहदेशेगवांनीत्वास्था
पयेच्चप्रयत्नतः॥दर्भाणांप्रतिमाःकार्याःपंचोर्णासूत्रवेष्टिताः॥यवपिष्टेनाञ्जलिग्राह्याभिः
सहशवंदहेत्।प्रेतवाहःप्रेतसखःप्रेतपःप्रेतभूमिपः॥प्रेतहर्त्तापंचमस्तुनामान्येतानिच
क्रमात्॥अथप्रयोगः॥एवंगुणेत्यादिअमुकगोत्रस्यामुकस्यधनिष्ठापंचकादिमरणस॰ एम
चितवंशानिष्टविनाग्न्यर्थंपंचकमरणविधिंकरिष्यइतिसंकल्प्यशंधमाल्याद्यैःप्रतिमा ५७

अलंकृत्यदाहसमयेप्रेतोपरिन्यसेत्।प्रथमांशिरसिद्वितीयांनेत्रयोः।तृतीयांवामकुक्षौ॥
चतुर्थीनाभौ।पंचमीपादयोः।ततुपरितोभ्योनाममंत्रैर्घृताहुतीर्हुत्वाशुद्धकधारांचदत्वा
॥युमायुसोमंसुतुतयुमायंजुहुताहविः॥युमंहयुज्ञोगच्छत्यग्निदूतोऽअरंकृतः॥त्र्यंबकंय
जामहेसुगंधिंपुष्टिवर्द्धनं॥उर्वारुकमिवबंधनान्मृत्योर्मुक्षीयमामृतात्॥इतिमंत्राभ्यांप्र
तिमासुप्रत्येकमाज्याहुतीर्जुहुयात्॥ततोविधिनाप्रेतंदहेत्॥सूतकांतेततःशुचिःकु र्याच्छां
तिकपौष्टिकं॥कांस्यपात्रस्थितंतैलंवीक्ष्यदद्याद्द्विजन्मने॥ब्रह्मविष्णुमहेशेंद्रवरुणप्रीतये
ततः।माषमुद्गयवव्रीहिप्रियंगवादिप्रयच्छति॥स्वर्णदानंरुद्रजाप्यंलक्षहोमोद्विजार्चनं।गोभू
दानंषडेतानिकुर्याद्दोषोपशांतये॥अन्यत्रापि॥स्वगृह्योक्तविधानेनकृत्वाग्निस्थापनततः
अन्वाधानंनिर्वपणंदेवतानांततोहुतीः॥यमायधर्मराजायमृत्यवेचांतकायच॥वैवस्वता

यकालायसर्वभूतक्षयायच॥औडुंबरायदध्नायनीलायपरमेष्ठिने॥वृकोदरायचित्रायचि
त्रगुप्तायवैक्रमात॥विधिनाश्रपणंकृत्वाएकैकामाहुतिंहुनेत्॥अन्यत्रापि॥धनिष्ठापंच
कमृतेपंचरत्नानितन्मुखे।न्यस्याहुतित्रयंदद्यात्कर्तीवद्ववषडिति।ततोनिर्हरणंकुर्या
द्वेषसाग्नेर्विधिःस्मृतः॥इतरंनिखनेद्देवज्ञलेवाप्रतिपादयेत्॥द्विपदक्षेमुखेतद्वद्विरण्य
मेकलंमुखे॥एकादशेऽग्निसंप्राप्तेप्रातरुत्थायपुत्रकः॥आहृत्यकलशान्पंचस्थापयेद्दक्ष
मंत्रतः॥सौवर्णीराजतीर्वापिस्थापयेत्पंचमृन्मिकाः॥ऋक्षमंत्रैःप्रतिष्ठाप्यस्थापयेत्कलशो
परि।पूजांतत्रविधानेनकारयेन्नक्षिपूर्वकं॥ऋक्षमंत्रेणसंपूज्यधूपदीपैश्चदीपिताः॥नैवेद्यं
कारयेत्तत्रप्रेतमुद्दिश्यकल्पयेत्॥आरार्तिकंततःपश्चाद्यथोक्तविधिनाततः॥कुंभाग्रे
स्थंडिलंकृत्वास्थापयेच्चविभावसुं॥आज्यस्यसंस्कृतिंकृत्वाबर्हिरास्तरणंततः।यद्वान्मंडल

पयेत्तत्रअधिदेवसमन्वितान्।प्रतिष्ठाप्यग्रहांश्चैवआज्यसंस्थापनंततः।इध्माधानंततःकृ
त्वाआघारौघ्यथाहोमयेत्।ऋक्षमंत्रैस्ततोहुत्वास्रुवेणाज्याहुतीःपृथक्।ततस्तिलाक्षतैर्हो
मंग्रहर्क्षाणांचकारयेत्।यमायधर्मराजायऔडुंबरायदधिपतयेवृकोदरायचित्रगुप्तायवैक्रमात।विधि
नाश्रपणंकृत्वाएकैकामाहुतिंहुनेत।प्रायश्चित्तंततोहुत्वापूर्णादद्याच्छुभावहां।यद्वान्मंडपं
कारयेत्तत्रगंधपुष्पैश्चधर्मतः।शुभ्रेणनारिकेलेनअर्घ्यंदत्वाविधानतः॥ततोदुग्धंसमादाय
सर्वौषधिसमन्वितं॥दक्षिणाभिमुखोभूत्वातर्पयेद्दक्षमंत्रतः।प्रेतायतर्पणंकृत्वाततःप्रेत
गणायच॥ततस्तुदक्षिणादेयाप्रेतस्यमुक्तिहेतवे॥अनेनविधिनायावत्कर्तव्यंऋक्षपंच
के॥यस्यगेहेभवेच्छांतिःसुखंप्राप्नोत्यसंशयं।पुण्याहवाचनंकृत्वाविधिनाशांतिकारकः।
देवस्यत्वेतिमंत्रेणपावमान्याततःपरं॥समुद्रज्येष्ठामंत्रेणत्रायंतामितिमंत्रतः॥ततःपौरुषि

कैर्मंत्रैरभिषिंचेत्तमूर्धनि।आशीर्वादादतःपूर्वंदानंदद्यान्ततःपरं॥तिलालोहंहिरण्यंचकार्प
संलवणंतथा।सप्तधान्यंक्षितिर्गोवएकैकंपावनंस्मृतं॥कांस्यपात्रस्थितंतेलंवीक्ष्यदद्याद्वि
जन्मने।पूर्वंकुंभेकृणुष्वपाजइत्यनुवाकः॥दक्षिणेतदेवाधार्यः॥पश्चिमेकृत्वंवाचं॥उत्त
रवसोःपवित्रं॥ईशान्यरुद्रजपं॥इतिपंचकविधानं॥सर्पदष्टेनागव्रतंकार्यं॥तत्संवत्स
रंश्रावणशुक्लपंचमीमारभ्यपंचम्यामुपवासः।यद्वाचतुर्थ्यामेकभक्तंपंचम्यांचनक्तंदारु
मयंमृन्मयंवानागंपंचफणंकृत्वागंधैःगतपत्रैः करवीरर्जातिपुष्पैर्धूपैर्दीपैरनंतंवा
सुकिंशंखपद्मंकंबलंकर्कोटकमश्वतरंधृतराष्ट्रंशंखपालंकालियंतक्षकंकपिलंचप्र
तिमासं नामभिःशुक्लपंचम्यांसंपूज्यब्राह्मणान्घृतपायसमोदकैर्भोजयेत्॥संवत्सरांतेचै
वंसंपूज्यमेब्राह्मणभोजनंरत्नंसौवर्णनागदानंगोदानंचकुर्यात्॥अथवाउभयोःपक्षयोः

पंचम्यांभूमौपिष्टेननागंविलिख्यसितपुष्पैःसितेनगंधेनतिलतंडुलैरभ्यर्च्यगव्यंक्षीरं
मोदकंचभूमौनिवेद्योपस्थायैवंवदेत्।मुंचमुंचामुकमितिदृष्टेमधुरमश्नीयात्।एवमु
क्तंविधिनानागमभ्यर्च्यपूर्णेऽह्नेयथाशक्तिसौवर्णनागंगांचदद्यात्॥ततोनारायणबलिं
कृत्वाश्राद्धादिसर्वंकुर्यात्॥अत्रमूलवचनानिस्मृतिरत्नावल्यांज्ञेयानि।अथपूर्वोक्त
पाखंड्यादीनांबुद्धिपूर्वकान्मोहातिनांचनारायणबलिप्रयोगः॥कस्यांचिच्छुक्लै कादश्यांन
दीमन्यद्वातीर्थंगत्वानानादिकृत्वाचम्यप्राणानायम्यदेशकालौनिर्दिश्यअमुकगोत्रस्या
मुकनामेणःआत्मदृष्यापाखंडित्वादिजनितपापोपशमनद्वारोर्ध्वदेहिकेसंप्रदानयोग्य
तासिध्यर्थंनारायणबलिंकरिष्यइति।कलशपंचकंव्रीहीणांयवानांचोपरिस्थापयि
त्वोदकेनार्घ्यपात्रंदिग्विदिक्षुतिमंत्रत्रयेणाभिमंत्र्यसर्वौषधिगंधपुष्पादिप्रत्येकंप्रक्षिप्यवस्त्रेण

वेष्टयित्वापुष्पाणिपंचरत्नानिचप्रक्षिप्यतदुपरिनाम्रादिपात्रेब्रह्मविष्णुशिवयमप्रेतानांपं
चमूर्तीःस्थापयेत्॥आवाहनादयउपचाराःकार्याः॥तत्रविष्णोःपुरुषसूक्तेनप्रज्ञा॥सहस्र
शीर्षेतिआवाहने॥पुरुषएवेत्यासनं॥एतावानितिपाद्यं।त्रिपादित्यर्घ्यं॥तस्माद्विराळित्या
चमनं॥यत्पुरुषेणहविषातेयज्ञंवसूत्रं॥तस्माद्यज्ञात्सर्वहुतःसंभृतंपवीतं॥तस्माद्यज्ञात्सर्वहु
तऋचःगंधं।तस्मादश्वाःपुष्पं॥यत्पुरुषेणधूपं॥ब्राह्मणोस्यदीपं॥चंद्रमाइतिनैवेद्यं॥ना
भ्याआसीदितिफलं॥सप्तास्यासन्नितितांबूलं॥यज्ञेनयज्ञंपुष्पांजलिं॥ब्रह्मणः।हिरण्यगर्
भःसमवर्त्तताग्रेभूतस्यजातःपतिरेकआसीत्॥सदाधारपृथिवीद्यामुतेमांकस्मैदेवायहवि
षाविधेम इति।रुद्रस्यकुडुंबायेति॥यमस्ययमायसोममिति॥प्रेतस्यनाममंत्रेणषोड॰ ६० नम
शोपचारैःपंचदेवताःपूजयित्वास्वगृह्योक्तमार्गेणस्थंडिलेग्निंप्रतिष्ठाप्यचरुहोमंकुर्यात॥

अन्वाधानेआज्यभागांतमुक्तानारायणंपोडशकृत्वश्चरुणायक्ष्यइत्युक्ताऽग्नौस्विष्टकृत
मित्यादिप्राक्कृतमुक्ताऽन्वाधानसमिधौहुत्वास्वगृह्योक्तमार्गेणनिर्वापादिविधिं नाचरं
श्रपयित्वाज्यभागांतंकृत्वापुरुषसूक्तेनषोडशाहुतीर्हुत्वानारायणायेदमितित्यागः॥अ
न्यत्सर्वंप्राक्कृतंसमाप्यार्चितदेवसमीपेऽमुकगोत्रायामुकशर्मणेप्रेतायविष्णुरूपिणेऽयंपि
ंडइतिमधुघृताक्तंतिलमिश्रांदद्यात्पिंडानविष्णुरूपेणप्रेतमनुस्मरन्प्रेतस्यनामगोत्रे
उच्चार्यदक्षिणाग्रेषुदर्भेषुदक्षिणाऽभिमुखोऽपसव्येनदत्वा॥यन्नेयमितिसूक्तेनपिंड
ानुमंत्र्यक्रौंःशंखोदकेनपुरुषसूक्तेनपिंडानभिषिच्यगंधाद्यैरभ्यर्च्यपिंडप्रदक्षिणांत
कृत्वानघ्रांक्षिपेत॥नपत्न्यैदद्यात्॥ततःपुरुषसूक्तेनप्रेतनामगोत्रउक्ताऽमुकनारायण
रूपंतर्पयामीतिषोडशावारंतर्पयेत् प्रत्यृचं॥ततःपुरुषाहारपरिमितमन्नंविष्णवेब्रह्म

णेशिवायसकिंकरायययमायचबलिंगृह्णीत्वा। ब्रह्मविष्णुमहादेवायमश्चैवसकिंकराः॥ ब
लिंगृहीत्वाकुर्वंतुप्रेतस्यचशुभांगतिमितिप्रार्थ्यविष्ण्वादिभ्यइमंबलिंसमर्पयामीतिबलिं
दद्यात्॥स्मृत्यर्थसारेतुहोमतर्पणबलयोनोक्ताः॥ततःप्रतिदेवतंत्रिविधंफलंसमर्प्यार्घ
णमधुगुडसंपीषिनिवेदयेत्॥गीतादि नाजागरणंकुर्यात्॥ततोऽस्यामेवरात्र्यामयुग्मा
न्यंचसप्तनववाब्राह्मणानामंत्र्य उपोषितःश्वो
भूतेमध्याह्नेविष्वादीनभ्यर्च्यदेशादिस्मृत्वानारायणबलौविदितंआद्यपंचकमेकोद्दिष्ट
विधिनाकरिष्यइतिसंकल्प्यैकोद्दिष्टविधिनाब्राह्मणपादप्रक्षालनादिकृत्वायथाज्येष्ठं
मुदङ्मुखान्उपवेश्यार्घादत्तान्निप्रश्नांतंकृत्वापिंडपित्र्ययज्ञवडुल्लेखनाद्यवनेजनांतं एम
कृत्वाविष्णवेब्रह्मणेशिवायययमायसपरिवारायचतुरःपिंडान्दत्वानामगोत्रविशिष्टंविष्णुरूप ६२

प्रेतंस्मृत्वापिंडंदद्यात्।ततोविप्रानाचांतानदक्षिणाभिस्तोषयित्वातन्मध्येचैकंगुणवंतंब्रा
ह्मणंप्रेतस्थानेभोजितंप्रेतबुध्यासंस्मरन्भूमिहिरण्यादिनातिशयेनसंतोष्याक्षय्यस्थानेति
लदर्भयुतशंखोदकधारांदद्यात्॥ततस्तैःपवित्रपाणिभिर्ब्राह्मणैःकृत्वामुकगोत्रायामुक
शर्मणेप्रेतायविष्णुरूपायेदंतिलोदकमुपतिष्ठतामितिवाचयित्वा।सकृन्नातिलमुदकांजलि
रुपयेत्।ततःस्नात्वागुडान्नार्कंरुपायसादिस्वजनैः सहितोभुंजीनेति॥ ॥इतिश्रीरुमेश्वरभ
ट्टविरचितनारायणभट्टकृतायामौर्ध्वदेहिकपद्धतौनारायणबलिः॥ ॥सहगमनविधिः अथ
अथान्यारोढ्यंस्त्रीणामात्मनोभर्तुरेवच ॥सर्वपापक्षयकरंनिरयोत्तारणायच॥अनेक
स्वर्गफलदंमुक्तिदंचतथैवच॥जन्मांतरेचसौभाग्यंधनपुत्रादिवृद्धिदं॥एवंगुणेत्यादिआ
त्मनोभर्तुश्चैतज्जन्मजन्मांतरपरंपरार्जितसर्वपापक्षयद्वारलक्ष्मीनारायणप्रीतयेपुरुणोक्तने

वा
कफलप्राप्तयेन्वारोदणंकरिष्ये॥तदंगतयाविहितंहरिद्राकुंकुमांजनादिसौभाग्यद्रव्यसु
तवंशपात्रदानंकरिष्ये॥इतिसंकल्प्यसोपस्कराणिशूर्पाणिदद्यात्॥तत्रमंत्रः॥लक्ष्मीना
यणोदेवोबलसत्वगुणाश्रयः॥गाढंसत्वंचमेदेयाद्धायनैःपरितोषितः॥सोपस्कराणिशूर्पा
णिवायनैःसंयुक्तानिच॥लक्ष्मीनारायणप्रीत्यैसत्वकामाददाम्यहं॥अनेनसोपस्कारशूर्पदा
नेनलक्ष्मीनारायणौप्रीयेतां॥अग्नेःसमीपमागत्यपंचरत्नानिपल्लवे॥नीलांजनंततथावध्वा
मुखेमुक्ताफलंन्यसेत्॥ततोग्निमार्थनांकृत्वामंत्रेणानेननिश्चितं॥स्वाहासंश्लेषनिर्विणस
र्वगोत्रदुहितरान॥सत्वंमार्गप्रदानेननयमांपत्युरंतिकमिति॥अग्निमार्थ्य॥आज्येनाग्नौजु
हुयात्॥अग्नयेतेजोधिपतयेस्वाहा॥विष्णवेसत्वाधिपतयेस्वाहा॥कालायधर्माधिपतये ॥ ॥
स्वाहा॥पृथिव्यैलोकाधिष्ठात्र्यैस्वाहा॥अद्भ्योरसाधिष्ठात्रीभ्यःस्वाहा॥वायवेबलाधिपत ६२

यस्वाहा॥आकाशायसर्वाधिपतयेस्वाहा॥कालायधर्माधिष्ठात्रेस्वाहा॥अग्नयःसर्वसाक्षिणी
भ्यःस्वाहा॥ब्रह्मणेवेदाधिपतयेस्वाहा॥रुद्रायस्मशानाधिपतयेस्वाहा॥एकादशदुहितॄर्हु
त्वाकुर्यादग्नेःप्रदक्षिणां॥ततःशिलांसोपस्करांसंप्रज्यतामारुह्य॥फलपुष्पांजलिं गृहीत्वा।
अग्निंप्रार्थयेत्।त्वमग्नेसर्वभूतानामंतश्चरसिसाक्षिवत्।त्वमेवदेवज्ञानीपेनविदुषोनिमा
नुषाः।अनुगच्छामिभर्त्तारंवैधव्यभयपीडिता॥सत्वंमार्गप्रदानेनैनयमांभर्त्तुरंतिकं॥मंत्रमु न
च्चार्यस्मशानकैःपवित्रैश्चदुहितान्नानं।तांप्रेतसोत्तरतःसुप्तांदेवरःशिष्योवानमस्कृत्यकरेध
त्वाउदीर्घतिष्ठेत्यांमंत्राभ्यांसत्वरहितामुत्थापयेत्॥सत्वाधिकातुसुहृदःसमाश्वास्य
भर्त्तारंविष्णुरूपंस्मरंतीप्रविशेत्॥दाहीतः॥मृतेभर्त्तरियानारीधर्मशीलादृढव्रता॥अनु
गच्छतिभर्त्तारंशृणुतस्याश्चयत्फलं॥तिस्रःकोट्योर्धकोटीचयावंत्यंगरुहाणिवै॥तावंत्य

ह्मसहस्राणिस्वर्गलोकेमहीयते।मातृकंपैतृकंचैवयत्रकंन्याप्रदीयते।कुलत्रयंपुनात्येषा
भर्तारंयात्वनुगच्छति। इत्यादिवाक्यपर्यालोचनयासंकल्पेनतत्तत्फलमुल्लेख्यं।अन्वारोहणे
अवयवपिंडार्थःपाकस्तंत्रेणपिंडःपृथक्इतिदुंदपद्धतौ॥अन्यत्रतु॥अन्वारोहेनुनारी
णांपत्युश्चैकोदकक्रिया॥पिंडदानक्रियातद्वच्छ्राद्धंप्रत्याह्निकंतथा॥
अन्वारोहेकृतेपत्न्याःपृथकपिंडांस्तिलांजलीन्।पृथकस्तिलेनकुर्वीतदग्ध
ैकशिलेतथा॥नवश्राद्धानिसर्वाणिसपिंडीकरणंपृथक्॥एकएवदृषोत्सर्गोगोरेकातत्र
दीयते॥अन्वारोहणेएकचित्यारोहणेवास्त्रियाःपृथक् सपिंडनंनास्तिभर्तुःकृतेस्त्रियाः
कृतंभवतीतिस्मृत्यर्थसारे॥भर्त्रैवैकौत्यकेभर्त्रादित्रयेणेत्यन्ये॥अन्वारोहणंचगर्भिणीना
बालापत्यानांरजस्वलानांसूतिकानांचनिषिद्धं॥गर्भिणीनांतन्नज्जातिबधसमं।ब्राह्मण्य

ने

एम

६३

न

एकचित्यारोहणमेवंपृथकचित्यारोहणंक्षत्रियादिस्त्रियाःपृथक्सहवाचितिः॥असवर्णायाः
पृथक्चितिरेवमदनपारिजातमते अन्वारोहणेनवश्राद्धमात्रंपृथक्तत्रापिपितृमातामह
पार्वणद्वयवत्सहैवानुष्ठानं॥आपस्तंबः॥चितिंश्रेष्ठानुयानारीमोहाद्विचलिताभवेत्॥प्राजा
पत्येनशुध्येत्ततस्माद्दैवापकर्मणः॥भर्तुरनुगमनेचितिंभ्रष्टइत्यर्थः॥पत्यौरजस्वलायांयदाभ
र्तामृतःसाचदेशकालवशान्नदेवानुगंतुमिच्छतिनपंचमदिनंप्रतीक्षतेतत्रविधिरुच्यते॥
पदास्त्रियामुदक्यायांपतिःप्राणान्समुत्सृजेत्॥द्रोणमेकंतंडुलानामवहन्याद्विशुद्धये॥मुस
लाघातैस्तदस्थिस्रवतेयोनिमंडलात्॥विरजस्कांमन्यमानास्तेचित्रेतदस्थिक्षयं॥दृष्ट्वा
शौचंपकुर्वीतपंचभूत्तिकयापृथक्॥त्रिरात्रंद्विरात्रंतिदशपंचगवांदत्वात्वदःक्रमात्।विमा
णांवचनाच्छुद्धासमारोहेत्तुनान्यथा॥नारीणांसरजस्काणामियंशुद्धिरुदाहृता॥ ॥अथर

जस्वलामरणेविधिः॥अंतरिक्षेमृतायेचवस्त्रावसुभमादतः॥उदक्यासूतिकानारीचरेच्चां
द्रायणत्रयं॥संग्रहे॥पंचभिःस्नापयित्वानुगव्यैःप्रेतांरजस्वलां॥वस्त्रांतरेणवृत्तांकृत्वादा
येहिधिपूर्वकं॥वह्नौनातातपक्ते॥रजस्वलोःप्रेतायाःसंस्कारादीनिनाचरेत्॥ऊर्ध्वंत्रिरात्रा
त्स्नातायाःशवधर्मेणदाहयेदिति॥व्यहोत्तरंसंस्कारमाह॥अत्रदेशकालानुसारेणस्ववस्था
॥अद्येत्यादिअमुकगोत्रायाअमुकस्यारजस्वलामरणनिमित्तप्रत्यवायपरिहारार्थंऔर्ध्व
देहिकयोग्यत्वार्थंचचांद्रायणत्रयप्रायश्चित्तपूर्वकंशूर्पेणाऽष्टोत्तरशतस्नानानिकारयि
ष्य इतिसंकल्प्यब्राह्मणवचनेनचांद्रायणत्रयंकृत्वायवपिष्टेनप्रेतमनुलिप्यस्वयंस्ना
त्वाशूर्पादिकेनशतवारंस्नापयेत्॥प्रेतंप्रक्षाल्यभस्मगोमयमृत्तिकाकुशोदकपंचग
व्यशुद्धोदकैःस्नापयेत्॥पावमानीस्वस्त्ययनी र्यदंतियच्चदूरकेआपोहिष्ठातितिसृभिः

एम
६५

कयानदृतिनिसृभिःसंस्नाप्य॥पूर्ववस्त्रेपरित्यज्यविधिनादहेत्॥यद्वा॥रजस्वलांसूति
कांचमलेप्रक्षाल्यस्नापयित्वा॥काष्ठवद्दग्ध्वास्थीनिविधिनादहेत्॥अथसूतिकामरणे
सूतिकामरणेग्नेसर्वौषध्यनुलेपनं॥असूतकीतुसंस्पृष्टःशूर्पाणांतुशतंक्षिपेत्॥पूर्ववत्
संकल्प्यब्राह्मणवचनाच्चांद्रायणत्रयंकृत्वापूर्ववच्छतशूर्पस्नानानिकारयित्वाकुंभेज
लमादायपंचगव्यंतत्रक्षिप्तापोहिष्ठीयवामदेव्यवारुण्यादिपुण्यऋग्भिरभिमंत्र्यपूर्वो
क्तमंत्रैःस्नाप्यविधिनादहेत्॥अथसूतिकामरणेदिनभेदेनविशेषप्रायश्चित्तं॥सूतिका
तुयदासाध्वीविनातामरणेगता॥त्रिवर्षपूर्णपर्यंतंशुद्धेत्कृच्छ्रेणसर्वदा॥एतत्प्रथमव्य
हविषयं॥सूतिकातुयदानारीरजसानुपरिप्लुता॥म्रियतेचेत्तुसानारीद्विवर्षंकृच्छ्रमाच
रेत्॥एतद्द्वितीयव्यहविषयं॥सूतिकातुयदासाध्वीविनातामरणंगता॥अर्धकृच्छ्रेणशु

एतत्तृतीयग्रहविषयं॥१

ध्येतव्यासस्यवचनंयथा॥तथा॥सूतिकातुयदासाध्वीविलातामरणंगता॥त्रिषण्णवदि
नादर्वादेकाह्नेनविशुध्यति॥दशाहाद्वत्तरेषुतु॥प्रसूतिकायदानारीप्राणांश्चैवपरित्यजेत्॥
मासमेकावधिर्यावत्त्रिभिःकृच्छ्रैर्विशुध्यति॥तथासूतिकायांमृतायांतुकथंकुर्वंतियाज्ञिकाः
॥कुंभेसलिलमादायपंचगव्यंक्षिपेत्ततः॥पुण्यैर्भिरभिमंत्र्यापोवाचास्रुस्किंलभेत्ततः॥ते
नैवस्नापयित्वातुदादंकुर्योद्यथाविधि॥अस्त्रिंगावोमेत्रयाभिर्वीमदेव्यग्निरेवच॥अ
ग्नेश्चवारुणेर्मंत्रैःसंस्नाप्यविधिनादहेत्॥ ॥अथगर्भिणीमरणेविधिः॥ ॥यदागर्भ
वतीनारीसन्नाल्यासंस्थितोभवेत्।कुक्षिंभित्वाततःशल्यंनिर्दहेद्यदिजीवति॥प्रमीतंनि
क्षिपेन्नंतुप्रायश्चित्तंततपरं॥सात्रयस्त्रिंशताकृच्छ्रैःशुध्यतेस्वल्पदोषतः॥सगर्भंदहनेत
स्यावर्णजंवधपातकं॥प्रायश्चित्तंचरित्वातुशुध्यंतिपापकारिणः॥दग्ध्वातुगर्भसंयुक्तांत्रि

एम
६५

रात्रंकृच्छ्रमाचरेत्॥इत्यादिग्रंथांतरतोवगंतव्यं॥ ॥भट्टरामेश्वरसुतोभट्टनारायणःसुधी
र्व्यधत्तरुचिरांकारणामौर्ध्वदेहिकपद्धतिं॥आश्वलायनमार्गेणसंतिपद्धतयः स्मृतं।तान्य
त्रस्याविरोधायःपंडितैःसोवधार्यतां॥ ॥इत्यौर्ध्वदेहिकविधिः॥ ॥समाप्तः॥श्रीशुभ
मस्तु॥ ॥अज्ञानदोषान्मतिविभ्रमाच्चयत्किंचिद्हनंलिखितंमयेह॥तत्सर्वमाद्यैःपरि
शोधनीयंप्रायेणमुह्यंतिहियेलिखंति॥१॥ ॥ ॥ ॥ ॥

॥इतिश्रीरामेश्वरसूरिसूनुनारायणभट्टकृतायामौर्ध्वदेहिकपद्धतौगर्भिणीमर
णविधिःसमाप्तश्चायंग्रंथः॥ ॥संवत१८४७दुर्मतिसंवत्सरेवैशाखमासः॥ ॥
॥ ॥थाल्युपनामक श्रीषभट्टस्येदं॥

६६

Digitized with financial assistance from the Government of Maharashtra on 11 June, 2017

॥इतिअंत्येष्टिपद्धतिः॥६६॥

LIBRARY
OF THE
BOMBAY
BRANCH
OF THE
ROYAL ASIATIC SOCIETY